SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion.in

SAMVARDHINI :- 01/12/2025
Volume - 7
Issue - 2
(ISSN ONLINE :- 2583-7176)
https://samvardhini.in

# अभिज्ञानशाकुन्तलमधिकृत्यादर्शान्वेषणम्

उत्तमप्रसादः खतिवडाः

**शोधसारः**

कविकुलगुरुकालिदासविरचितं नाटकमभिज्ञानशाकुन्तलं न केवलं प्राच्यानामपितु पाश्चात्त्यानामपि विदुषां प्रेमास्पदं ग्रन्थरत्नमस्ति। विश्वसाहित्ये प्रसिद्धं नाटकमिदं समाजे सच्चारित्र्यं शिक्षयति । मानवनिवहानामादर्शञ्चोपदिशति । राज्ञा केन प्रकारेण भाव्यम् ? युवतीनां चरितं कीदृशमपेक्षितम् ? समाजे कथं वर्तितव्यम् ? इत्यादयः सर्वेऽपि विषया नाटककृता नाटके सन्निविष्टाः सन्ति। विषमपरिस्थितावपि सत्पुरुषाः स्वचारित्र्यं न दूषयन्ति, धर्मस्य मर्यादाया आदर्शस्य नीतेश्च मार्गो दुष्करो भवति। परं ये तस्मान्मार्गान्न विचलन्ति ते एव महत्त्वं प्राप्नुवन्ति । इत्यादयो विषया आलेखेस्मिन् विवेचिताः सन्ति । नाटके प्रदर्शिताः सर्वेऽपि विषयाः सन्दर्भाश्चादर्शोन्मुखाः परिणामे शिक्षाप्रदाश्च विद्यन्ते । मूलतो मानवेभ्यः सदुपदेशमादर्शञ्च शिक्षयति नाटकमिदमभिज्ञानशाकुन्तलमिति।

**कुटशब्दाः** - अङ्गुलीयकम्, धर्मपत्नी, वीतरागः।

**उत्तमप्रसादः खतिवडाः**
उपप्राध्यापकः
नेपालसंस्कृतविश्वविद्यालयः
अणुवाक्-संकेतः-
up.sharma977@gmail.com

**विषय-परिचयः**

महाकविकालिदासविरचितं अभिज्ञानशाकुन्तलमतिप्रसिद्धं नाटकमस्ति । नाटकमिदं न केवलं संस्कृतसाहित्येऽपितु विश्वसाहित्ये एव विख्यातं, सर्वजनविदितं च विद्यते । नाटकस्यास्य कथावस्तु महाभारताद्गृहीतमस्ति । कथेयं श्रीमद्भागवतेऽपि वर्णिता प्राप्यते (वेदव्यासः, २०७२, पृ.४१५) । अभिज्ञानशाकुन्तलमिति नामधेयं नाटकस्य कथं जातमिति सहृदयानां हृदि जिज्ञासा जागृयात् ? नाटकेनैव तत्साधुनिरूपितं विलोक्यते । राज्ञा दुष्यन्तेन शकुन्तलया सह गान्धर्वविधिना विवाहो विहितः । कतिचिद्दिनानन्तरं राजा दुष्यन्तः निजराजधानीं जगाम । गच्छता तेन स्वनामाक्षराङ्कितमङ्गुलीयकं शकुन्तलायै समर्पितम् । यदा महर्षिणा कण्वेन शकुन्तलादुष्यन्तयोर्विवाहविषयकः समाचारो ज्ञातस्ततः स्वलालिता पालिता च शकुन्तला पतिगृहं प्रेषिता । परन्तु दुर्वाससः शापकारणात् राज्ञा सा नैव स्वीकृता । शकुन्तला च राज्ञा पूर्वं प्रदत्तमङ्गुलीयकं प्रदर्श्य पूर्ववृत्तातं स्मारयितुमैच्छत् परं तदा तदङ्गुलीयकं शकुन्तलायाः पार्श्वे नासीत् । तच्च शक्रावतारे शचीतीर्थेऽभिवन्दनसमये जलेऽपतत् । ततो नष्टाशा शकुन्तला राजप्रासादान्निरगच्छत् । तस्मिन्नेवावसरे क्षणादेव तेजोमयी मूर्तिरदृश्यत । शकुन्तलां गृहीत्वा सा चादृश्यतामगात् । तदन्तरं राजपुरुषैः कस्यचित् धीवरस्य पार्श्वेऽगुलीयकं दृष्टम् । स च धीवरश्चौरबुद्ध्या राजपुरुषैर्गृहीतः । राजनामाङ्कितं तदङ्गुलीयकं च प्रधानराजपुरुषेण नृपाय दुष्यन्तायार्पितम् । यदा राजा तदङ्गुलीयकमपश्यत् ततः स्वप्रियां शकुन्तलामस्मरत् । शकुन्तलया सह विहितं गान्धर्वविवाहादिकमपि स्मृत्त्वा पश्चात्तापेन दग्धहृदयः तद्विरहेण शान्तिं नैवालभत । अनयारीत्या नाटकेऽस्मिन् अङ्गुलीयकस्याभिज्ञानात् शकुन्तलायाः ज्ञानविषयको वृत्तान्तः उपनिबद्ध इति नाटकस्य "अभिज्ञानशाकुन्तलम्" इति नामधेयमुपयुक्तमवलोक्यते । "तस्य दर्शनेन भर्त्रा कोऽप्यभिमतो जनः स्मृत इति । यतो मुहूर्तं प्रकृतिगम्भीरोऽपि पर्युत्सुकमना" (कालिदासः, २०१७, पृ. ३९५) इति राजश्यालकवचनात् नाटकस्यास्याभिधानं सार्थकतां भजते । शकुन्तलादुष्यन्तयोः कथा महाभारते पद्मपुराणे च प्राप्यते । पद्मपुराणस्य कथापेक्षया महाभारतस्य कथा प्राचीना प्रतीयते । पद्मपुराणस्य कथा महाभारतस्य कालिदासविनिर्मिताभिज्ञानशाकुन्तलस्य च कथां संयोज्य वर्णिता इव संलक्ष्यते । यतो हि अभिज्ञानशाकुन्तलस्य साररूपा एव विद्यते पद्मपुराणोक्ता । केषाञ्चन विदुषां मतमस्ति यत् -पद्मपुराणस्य बहवोंऽशाः कालिदासानन्तरमेव रचिता इति । अतः कालिदासेन स्वकीये नाटकेऽभिज्ञानशाकुन्तले महाभारतादेव कथा गृहीतेति निश्चित्य वक्तुं शक्यते । यद्यपि कविनानेन कथा महाभारतादङ्गीकृता तथापि तत्र सरसत्त्वमापादयितुं नाट्यानुकूलं विधातुं च बहुपरिवर्तनं कृतं विलोक्यते । नाटकेऽस्मिन् आरम्भात् समाप्तिपर्यन्तं सप्तसांवत्सरिकी

कथा नाटककृता सन्निबध्दानुभूयते। नाटकस्य प्रथमाङ्के राज्ञो दुष्यन्तस्य शकुन्तलया सह मेलनं जायते। तस्मिन् प्रथमे उभयोर्मेलने मिथोऽनुरागः अनन्यपरत्त्वं च सञ्जायते। तृतीयेङ्के पुनः तयोर्मेलनं तु जायते परन्तु गौतम्याः समागमनात् शारीरसम्बन्धो नैव सम्बध्यते। तृतीयचतुर्थाङ्कयोरन्तराले विष्कम्भके गान्धर्वविधिना शकुन्तलादुष्यन्तयोः विवाहो निष्पद्यते। ततो शकुन्तला च गर्भं दधे। चतुर्थाङ्कात् एतत्सर्वं ज्ञायते। पञ्चमाङ्के च राजधानीं प्रेषिता शकुन्तला दुष्यन्तेन परित्यक्ता, तस्मिन्नेव समये केनचित् ज्योतिःपुञ्जेन अदृश्यं नीता च। ततः पञ्चमाङ्कस्याङ्कावतारे राज्ञा अङ्गुलीयकं प्राप्तम्। तदभिज्ञानात् राजा शकुन्तलयाः शोकाब्धौ निमग्नः विललाप च। सप्तमाङ्के शकुन्तलया तत्पुत्रेण च सह राज्ञो मिलनं जायते। एतस्मिन् समये पुत्रस्य वयः षट्संवत्सरात्मकमनुमीयत इति नाटकस्यास्य घटनाचक्रं विचार्य समग्रं नाटकं सप्तसंवत्सरात्मकमस्तीति वक्तुं शक्यते। एतादृशं नाटकमभिज्ञानशाकुन्तलं विश्वसाहित्ये एव परिचितं वेविद्यते। नाटकेऽस्मिन्नाटककृता कालिदासेन पात्रमुखात् तेषां चरिताच्च मानवानां कृते उदात्तं चरितं प्रदर्शितमस्ति। तथा लोकोत्तरमानवादर्शोऽपि प्रकटितोऽनुभूयते। इदानीमभिज्ञानशाकुन्तलमाधृत्य तत्राभिव्यक्तानामादर्शानामनुशीलनं विधीयते।

### अध्ययनस्य समस्या

अध्ययनेऽस्मिन् निम्नाङ्किता समस्या विद्यते।

क) अभिज्ञानशाकुन्तलेऽभिव्यक्त आदर्शः कीदृशः? इति।

### अध्ययनस्योद्देश्यम्

समस्यानुसारमत्रोद्देश्यमिदमुपयुक्तं दरीदृश्यते।

क) अभिज्ञानशाकुन्तले आदर्शान्वेषणम्। इति।

### अध्ययनविधिः

अध्ययनस्यास्य सौविध्याय विशेषतः एपीए. पद्धतिस्तथा क्वचिच्छास्त्रीयपद्धतिश्चावलम्बिता विद्यते।

### अभिज्ञानशाकुन्तलाभिव्यक्तादर्शनिदर्शनम्

संस्कृतवाङ्मयं खलु मानवजीवनोपयोग्यादर्शवर्णनादिविषयेऽतिशयसमृद्धं सुस्पष्टञ्च दृश्यते। वैदिककालादेव वाङ्मयेऽस्मिन् मानवोचिता आदर्शाः प्रतिपादिताः प्राप्यन्ते।

“**मित्रस्य चक्षुषा समीक्षामहे**” (गिरिः, २०७६, पृ. १४०), “**मा गृधः कस्यस्विद्धनम्**” (ईशावास्योपनिषद् १), इत्यादिवचोभिर्वैदिकवाङ्मयं सर्वेभ्यः सदाचारमादर्शञ्च शिक्षयति। एवं “**सत्यं वद, धर्मं चर**” (गिरिः, २०७३, पृ. ११०) इत्याद्यौपनिषदी भणितिरपि आदर्शमेव द्योतयति। संस्कृतवाङ्मये प्रायः सर्वत्रैव मानवीयताया उपदेशा मन्त्रा वा समुपलभ्यन्ते, चतुर्वर्गफलसाधिनी भगवती श्रुतिरपि मानवान् सावधानं कुर्वन्ती नैकत्र निर्दिशति - जगदिदं सर्वमपीशमयमीश्वरादितरं वस्तु किमपि नास्ति। परद्रव्यलोलुपता सर्वथा क्षयकारिणी वर्तते, कदाचिदपि स्वाध्याये प्रमादो नैव करणीयः, समस्तमपि जगदिदमेकस्मिन्नेव सूत्रे निबद्धमस्तीति। सर्वथा सत्यभाषणाय, धर्माचरणायाजीवनं स्वाध्यायानुष्ठानाय समुद्योगाय चतुर्वर्गफलावाप्तये परस्परं सौहार्दपूर्णव्यवहाराय श्रुतयो मानवानुपदिशन्ति। न केवलं श्रुतय एव मानवीयतायाः पाठं पाठयन्ति अपि तूपनिषदः, श्रुत्यनुकूलाः स्मृतयो धर्मशास्त्राणि, पुराणशास्त्राणि, काव्यानि किमधिकं निखिलान्येव शास्त्राणि मानवीयादर्शस्य पाठं पाठयन्ति। तेषु नैकमपि वाक्यमधर्माचरणाय विधिविहितानुशासनभङ्गायोपदिष्टं दृश्यते। तत्र तत्र बालकावस्थातः समारभ्य पौगण्ड-कुमार-तरुण-प्रौढ-वृद्धावस्थासु क्रियमाणानां कर्तव्यानां समुल्लेखो विद्यते। आनन्दसुस्वास्थ्यदीर्घायुर्वैभवैश्वर्यादीनां दिव्यसुखानामवाप्तेरुपाया अपि शास्त्रेषूपलभ्यन्ते। काव्यानां प्रणयनं तु सरलतया मानवो मानवीयतायाः शिक्षामवाप्नुयादिति दिव्यभावं हृदि विचार्यैव भवेदिति प्रतीयते। मधुरया शैल्या बोधगम्यभाषया काव्यशास्त्राणि मानवमात्रस्य कृते चतुर्वर्गफलप्रदानाय समुपदिशन्ति। सन्दर्भेऽस्मिन् कविकुलगुरु-कालिदासप्रणीते अभिज्ञानशाकुन्तल-नामधेये विश्वविश्रुते नाटकरत्ने मानवीयताया बहूनां मानवहितसाधकानां तत्त्वानामुदाहरणानि प्राप्यन्ते, यद्यपि यदा दौहृदलक्षणामनन्यपरायणां मेनकात्मजां गान्धर्वविधिना परिणीतां स्वधर्मपत्नीं शकुन्तलां दुर्वासश्शापमोहितो राजा दुष्यन्तो ऽरुन्तुदैर्वचोभिरवमाननपुरःसरं परावर्तयति गौतमीशार्ङ्गरवशारद्वतैः कण्वशिष्यैः शकुन्तलया च सप्रमाणपुरःसरं विनिवेदितैः सत्यवचोभिरपि राजा दुष्यन्तो मनागपि विचलितो न भवति- “**मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये। दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांशुलः**” (कालिदासः, २०१७, पृ. ३७७)’ इति। विचारयन् निर्णयं विधातुं नहि प्रभवति। यतो हि परदाराभिमर्षणं धर्मशास्त्रेषु गर्हितम् (वेदव्यासः, २०७२, पृ. ५४२)। सतीं साध्वीमासन्नप्रसवां स्वधर्मपत्नीं नहि गृह्णाति, तत्र कथं मानवतायाः संरक्षणमभूदिति विद्यमानेऽपि सन्देहे शकुन्तलायाः तिरस्कारे दुर्वासश्शापकारणमेवास्तीति, अङ्गुलीयप्राप्तेरनन्तरं राज्ञः शकुन्तलामाश्रित्य क्रियमाणमार्मिकविलापान्निश्चीयते। विशिष्टपुरुषेण सावधानपुरःसरं कृतेऽपि प्रयत्ने कुत्रचित् त्रुटयो भवन्त्येव, अतश्च “**बलवदपि शिक्षितानामात्मनि अप्रत्ययं चेतः**” (कालिदासः,

२०१७, पृ. ८) इत्युक्तिर्नूनमेवात्र चरितार्था भवति। अतो मानवैः सर्वथा सिद्धप्रायेपि कार्ये सावधानतयैव वर्तितव्यमिति सूत्रधारोक्तौ मानवीयमूल्यं द्रष्टुं शक्यते। शकुन्तलां विलोक्य तस्या अलौकिकरूपमाधुर्ये नितरामासक्तोपि राजा शकुन्तलेयं मया पत्नीत्वेन ग्राह्या उत ग्रहीतुमयोग्येति विचारयति, विवेकी राजा दुष्यन्तः स्वात्मनि पूर्णरूपेण विश्वसिति, शकुन्तला मुनिकन्यैव स्यात्तर्हि त्वनेन प्रकारेण तस्याश्चिन्तनं सर्वथाऽनर्थकरमधर्मसाधनं च किन्तु विशुद्धं मनो मे नितरामिच्छति ताम्, मनश्च मे सर्वथा विवेकगुणसम्पन्नं विद्यते। अनेनेदं सुतरां निश्चितं भवति यत् शकुन्तलेयं नहि ब्राह्मणतनया, तत्र हेतुस्तु मदीयमार्यं विवेकगुणसम्पन्नं मनस्तस्यां नितरां रतमस्ति। वक्ति च निःसन्देहमियं शकुन्तला क्षत्रीयपरिणययोग्या, अत्र हेतुस्तु कुलीनस्य मे पवित्रं मनोऽस्यामभिलाषि वर्तते, यतो हि संशयास्पदेषु विषयेषु सतामन्तःकरणस्य व्यापारा एव निर्णायका भवन्ति । यथा- **अशंसयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः । सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः** (कालिदासः, २०१७, पृ. ४५) इति । अत्र शकुन्तलाया रूपमाधुर्ये सर्वथा निमग्नोऽपि राजा स्वकीयं चरित्रं मनागपि न जहाति, हिताहितं धर्माधर्मं च सम्यग्रूपेण विविच्यैव कार्यसम्पादने प्रवृत्तो दृश्यते । यदा हि मुनिः कण्वो गान्धर्वविधिना परिणीतां शकुन्तलां स्वपत्युः सकाशं प्रापयितुं प्रेषयितुं वेच्छति, ततश्चाद्य शकुन्तलेयं पतिगृहं गमिष्यतीति चिन्तनमात्रेण काश्यपः प्रपीडितो दृश्यते, यद्यपि चतुर्थाङ्कस्यान्तिमे पद्ये "**अर्थो हि कन्या परकीय एव तामदद्य संप्रेष्य परिग्रहीतुः। जातोऽस्मि सद्यो विशदान्तरात्मा चिरस्य निक्षेपमिवार्पयित्वा**" (कालिदासः, २०१७, पृ. ३०८) इत्यत्र कन्या परकीया एव अतस्तस्यां मोहो नितरां व्यर्थ इति सूचयति कविकालिदासः कण्वमुखेन, तथापि शकुन्तलायाः सम्भावितवियोगजन्या पीडा सर्वथा विषयपराङ्मुखं काश्यपं परिपीडयति तत्र, चिन्तयति कण्वः - अस्मिन्नहनि मे पोष्यपुत्री शकुन्तला पतिगृहं गमिष्यतीति हेतोः मनो मे दुःखेन पीडितमस्ति, मादृशस्य वीतरागस्यापि कन्याविरहजन्या पीडा ईदृशी दुःसहनीया भवति चेद्रागान्वितानां गृहस्थानां कीदृशी स्थितिर्भवेदित्याशयः । उक्तञ्च- **यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,**

**कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।**
**वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः,**

**पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः** (कालिदासः, २०१७, पृ. २७१) इति ।। अत्र विचार्यते यद् वीतरागोऽपि भगवान् कण्वः पुत्रीविरहजन्यां सुदुस्सहां पीडामनुभूय साधारणैः सांसारिकैर्विषयेऽस्मिन्ननुभूयमानां पीडां नितरामेकत्वेनानुभवति।

परदुःखस्यानुभवेन मानवीयादर्शः प्रकटितोऽस्ति। निखिलेष्वपि स्थावरजङ्गमेषु समदृष्टिर्मानवेतरप्राणिषु चात्मिकदृष्ट्या व्यवहारः तेष्वैक्यभावस्थापनं मानवीयादर्शस्य विशिष्टमुदाहरणं मन्तव्यमेव। अत्र च शकुन्तला पतिगृहगमनकाले कण्वर्षिस्तपोभूमिविद्यमानान् लतावृक्षादीन् शकुन्तलायाः पतिगृहगमनविषयकं वृत्तान्तं श्रावयन् तां च पतिगृहं गन्तुमनुमतिं प्रयच्छन् वक्ति – हे तपोवनलतातरवः शकुन्तला युष्मानकृतजलसिञ्चनात् पूर्वं या जलं पातुं न प्रवर्तते स्म, भूषणप्रियापि स्नेहवशाद्भवतां पल्लवं नहि गृह्णाति स्म, भवतां नवकुसुमप्रसूतिकाले या हर्षान्विता भवति स्म, सैषा शकुन्तला स्वपतिनिकेतनं याति भवद्भिः अनुमन्यताम्-

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**
**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्**

(कालिदासः, २०१७, पृ. २७६) इति ।।

अत्र शकुन्तलायाः प्रकृतेश्चैकत्वेन साकमेव शकुन्तलायाः तपोवनप्राणिषु विहिता निर्मलास्तथैकत्वव्यवहारा मानवादर्शस्यानुकरणीयाः पक्षाः । पतिगृहगमनोद्यतां शकुन्तलां पिता कण्वर्षिरित्थमुपदिशति, स्वोपदेशे सर्वप्रथमं स गुरून् शुश्रूषस्व, अर्थाद् गुरुजनान् श्वशुरादीन् पूज्यान् सेवस्व, मदुक्तमुपदेशवचनं सावधानतया श्रृणु, इत्यादिभिर्वचनैस्तामनुशास्ति-

**शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने,**
**भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः ।**
**भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी,**
**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।।**

(कालिदासः, २०१७, पृ. २९७) इति।।

किमिदं मानवीयादर्शस्य विशिष्टमुदाहरणं साम्प्रतिकैरपि जनैरनुक्रियते चेत् समाजस्य कल्याणंनहिसम्भवति? तत्र तु पदेपदे मानवीयादर्शस्य मन्त्राः प्राप्यन्ते। दुष्यन्तशकुन्तलामधिकृत्य कण्वर्षिणा कृता व्यावहारिकाः सदुपदेशा मानवादर्शस्य मननीयाः विषया वर्तन्ते । नाटकस्य षष्ठेऽङ्केऽमात्यप्रेषितं पत्रमादाय प्रतिहारी समागच्छति, तत्पत्रं गृहीत्वा वाचयति च राजा। तत्रोल्लिखितं भवति- धनवृद्धिर्नाम वणिङ् नौव्यसने मृतः, स चानपत्यः, अतस्तस्य निखिलमपि

वसु राजस्वतामापद्यते नियमतस्तादृशस्यानपत्यस्य धनं राजकोशे गच्छति । “ किन्तु ज्ञात्वा चैतद् वृत्तान्तमनुभूयते मया यदेष धनवृद्धिर्महाधनिकतया बहुपत्नीको भवेत्तदन्विष्यतां यदि तस्य पत्नीषु काचिदन्तर्वत्नी भवेत्, यदि भवेच्चेत् स गर्भस्थ-शिशुः पित्र्यं रिक्थमर्हति, अत्रान्तरे प्रतिहारी ब्रवीति राजानमिदानीमेव साकेतपुरस्य श्रेष्ठिनो दुहिता निवृत्तपुंसवना तस्य जाया श्रूयते देव! । धर्ममर्मज्ञो राजा तस्य स्वामी स एव गर्भस्थ-शिशुरेवेति निश्चित्य तदनुकूलमादिशति । अत्र मानवीयादर्शस्य महान्तो गुणा दृष्टिपथे समायान्ति राज्ञो धर्माधर्मनिर्णये । सन्दर्भेऽस्मिन्नेव प्रजावत्सलो राजा दुष्यन्तः प्रतिहारिणमिदमुद्घोषयितुमादिशति यद्देशेऽस्मिन् मम यावन्तो देशवासिनः सन्ति तेषु यो येन स्वप्रियेण बान्धवेन वियुक्तो भवेत् तत्र ऋते पापात् (पापकर्म परित्यज्य) सर्वेषां प्रियबन्धुरयं दुष्यन्त इति-

**येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना ।**
**स स पापादृते तासां दुष्यन्त इति घुष्यताम्**

(कालिदासः, २०१७, पृ. ४७२)॥

कथनस्यायमाशयो भवेत् कवेः, पापादृते इति पदेन यद् यस्य पिता पुत्रादयः सम्बन्धिनो मृतास्ते दुःखिनो न भवेयुः तेषां पिता पुत्रः शिष्यरूपेणाहं वर्ते, अहं तस्य पुत्रः, अहं पिता बन्धुरिति, किन्तु यस्याः पतिर्मृतश्चेदहं तस्य पतिः कदापि नहि भवितास्मि अत्र पापमस्ति । अत्र दुष्यन्तस्य व्यवहारेऽतुलनीयो मानवादर्शः परिदृश्यते । एवंविधा राजान इतिहासे विरला एवाभूवन् । यदा चैन्द्रं कार्यं परिसमाप्य पृथिव्यामवतरणसमये तपस्विनां साधनास्थलीभूते हेमकूटनाम्नि किम्पुरुषवर्षे तपसि रतं सुरासुरगुरुं सपत्नीकं काश्यपमुनिं द्रष्टुमैच्छन् मातलितो लब्धपरिचयो दुष्यन्तः, तदा वक्ति मातलिं ह्यनतिक्रमणीयानि श्रेयांसि प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामीति । एष राजा कण्वमारीचयोर्ब्रह्मर्ष्योर्नितरां कृपाभाक् कथमपि तपोरतानामृषीणां दर्शनं करोत्येव, यतश्च स सम्यग् जानाति ऋषिप्रभावः। अतश्च भगवन्तं काश्यपमुनिं प्रदक्षिणीकृत्य गन्तुमैच्छद्राजा मानवीयादर्शस्य नितान्तमुत्कृष्टतममुदाहरणमिदं साम्प्रतमप्यस्मान् विनम्रतायाः पाठं पाठयति । शकुन्तलाया निखिलमपि जीवनं, त्यागस्य भावः, सहनशीलतायाः पराकाष्ठा सत्यवादिताप्रभृतयो गुणा मानवसमाजस्य नितरामुपयोगिनो दृश्यन्ते। यदा दुर्वासश्शापमोहितो राजा दुष्यन्तः शकुन्तलामुपेक्षते मानवकर्तव्ये दोषभावं विलोकयन्ती क्रोधान्विता शकुन्तला राजानं वाग्बाणैरधिक्षिपति । यूयमेव प्रमाणं जानीथ- धर्मस्थितिञ्च लोकस्य, लज्जाविनिर्जिता जानन्ति न किमपि स्त्रियः (कालिदासः, २०१७, पृ. ३६६) इति । अस्याशयोऽयमस्ति भवन्त एव विधिनिषेधात्मकं शास्त्रं लोकधर्ममर्यादाञ्च जानन्ति। लज्जाविवशाः स्त्रियस्तु न किञ्चिदपि

जानन्ति, इत्थं भवतो लोकविश्रुतं विशुद्धं चरित्रं कथं वाहमवगन्तुं प्रभवामि ? भवदीयं प्रथितं दुष्यन्तस्य चरितम् इति यद् भवता प्रोक्तं तच्च कथमहं स्वीकुर्याम्। वाग्बाणैः परिपीडिता शकुन्तला यदा शारद्वतादीननुगन्तुं सुनिश्चितवती, किन्तु त्वमत्रैव तिष्ठेति गुरुसमेन गुरुशिष्येण प्रोक्ता सा बाष्पयुक्तां दृष्टिं क्रूरे मयि समर्पितवती किन्तु मया परस्त्रीसंसर्गजन्यपापभयात् सा प्रत्यादिष्टा तत् सर्वमेव वृत्तं विषाक्तं शल्यमिव मां निर्दहति, तदानीं माधव्यो विदूषकः जिज्ञासते- अस्ति मे तर्कः, केन पुनस्तत्रभवती आकाशसञ्चारिणा नीतेति ? तमुत्तरयन् ब्रवीति राजा कः पतिव्रतां तामन्यः परामर्ष्टुमुत्सहते, मेनकया नीता भवेदिति शङ्कते मनो मे। तदा शकुन्तलानुचिन्तया व्याकुलं राजानं समाश्वासयन्नब्रवीद्विदूषकः चिन्ता भवता नैव करणीया, तया सह नूनमेव यथाकाले मिलनं भविष्यति, यतो न खलु मातापितरौ भर्तृवियोगदुःखितां दुहितरं चिरं प्रेक्षितुं पारयतः । अत्र मेनका भवन्तमवश्यमपि न हि द्वेष्टि, सा शकुन्तलायाः पतिवियोगजन्यं मलिनं मुखं द्रष्टुं नहि पारयति । अत्र मानवीयसमवेदनाया उत्कृष्टमुदाहरणं दृश्यते। अनेन प्रकारेण अभिज्ञानशाकुन्तलनाटके स्थले स्थले मानवीयादर्शस्य समुत्कृष्टमुदाहरणं दृश्यते ।

**उपसंहारः**

कालिदासविरचितं नाटकमभिज्ञानशाकुन्तलं सर्वविदितमुत्कृष्टं नाटकमस्ति। कालिदासस्य कृतिषु नाटकमिदं सर्वातिशायि वेविद्यत इति काव्येषु नाटकं रम्यम् इत्युक्तिरेव प्रमाणयति । नाटकेऽस्मिन् कविना मानवीयादर्शस्य बहूनि उदाहरणानि प्रस्तुतानि सन्ति । तथा बहूनां मानवहितसाधकानां तत्त्वानामुदाहरणानि चात्र प्राप्यन्ते, यद्यपि यदा दौहृदलक्षणामनन्यपरायणां मेनकात्मजां गान्धर्वविधिना परिणीतां स्वधर्मपत्नीं शकुन्तलां दुर्वासश्शापमोहितो राजा दुष्यन्तोऽरुन्तुदैर्वचोभिरवमाननपुरःसरं परावर्तयति तदा गौतमीशार्ङ्गरवशारद्वतैः कण्वशिष्यैः शकुन्तलया च सप्रमाणपुरःसरं विनिवेदितैः सत्यवचोभिरपि राजा दुष्यन्तो मनागपि नैव विश्वस्तवान् जायते । एतत्सर्वं विलोक्य कण्वशिष्याणां कथनं श्रुत्वापि निर्णयं विधातुं राजा नहि प्रभवति। यतो हि परदाराभिमर्षणं धर्मशास्त्रेषु गर्हितमस्ति । स्वकीयां प्रियां शकुन्तलां निजपत्नीत्वेनाज्ञात्वा साध्वीमासन्नप्रसवां स्वधर्मपत्नीमपि नहि गृह्णाति, तत्र कथं मानवतायाः संरक्षणमभूदिति विद्यमानेऽपि सन्देहे शकुन्तलायाः तिरस्कारे दुर्वासश्शापकारणमेवास्तीति, अङ्गुलीयप्राप्तेरनन्तरं राज्ञः शकुन्तलामाश्रित्य क्रियमाणमार्मिकविलापाच्छकुन्तलोपरि राज्ञः वास्तविकी प्रीतिरस्तीति निश्चीयते। विशिष्टपुरुषादपि सावधानपुरःसरं कृतेऽपि प्रयत्ने कुत्रचित् त्रुटयो भवन्त्येव, अतश्च "बलवदपि शिक्षितानामात्मनि अप्रत्ययं चेतः" इत्युक्तिर्नूनमेवात्र चरितार्था भवति। अतो मानवैः सर्वथा सिद्धप्रायेऽपि कार्ये सावधानतयैव वर्तितव्यमिति सूत्रधारोक्तौ

मानवीयादर्शः द्रष्टुं शक्यते। शकुन्तलां दृष्ट्वा शकुन्तलाया रूपमाधुर्ये सर्वथा निमग्नोऽपि राजा स्वकीयं चरित्रं मनागपि न जहाति, हिताहितं धर्माधर्मं च सम्यग्रूपेण विविच्यैव कार्यसम्पादने प्रवृत्तो दृश्यते। पतिगृहगमनोन्मुखां शकुन्तलां दृष्ट्वा महर्षिः कण्वो विचारयति यत्-अस्मिन्नहनि मे पोष्यपुत्री शकुन्तला पतिगृहं गमिष्यतीति हेतोः मनो मे दुःखेन पीडितमस्ति, मादृशस्य वीतरागस्यापि कन्याविरहजन्या पीडा ईदृशी दुःसहनीया भवति चेद्रागान्वितानां गृहस्थानां कीदृशी स्थितिर्भवेत् । वीतरागोऽपि भगवान् कण्वः पुत्रीविरहजन्यां सुदुस्सहां पीडामनुभूय साधारणैः सांसारिकैर्विषयेऽस्मिन्ननुभूयमानां पीडां नितरामेकत्वेनानुभवति। परदुःखस्यानुभवेन मानवीयादर्शः प्रकटितोऽस्ति । निखिलेष्वपि स्थावरजङ्गमेषु समदृष्टिर्मानवेतरप्राणिषु चात्मिकदृष्ट्या व्यवहारः तेष्वैक्यभावस्थापनं मानवीयादर्शस्य विशिष्टमुदाहरणं मन्तव्यमेव । अत्र च शकुन्तला पतिगृहगमनकाले कण्वर्षिस्तपोभूमौ विद्यमानान् लतावृक्षादीन् शकुन्तलायाः पतिगृहगमनविषयकं वृत्तान्तं श्रावयन् तां च पतिगृहगन्तुमनुमतिं प्रयच्छन् वक्ति - हे तपोवनलतातरवः शकुन्तला युष्मानकृतजलसिञ्चनात् पूर्वं या जलं पातुं न प्रवर्तते स्म, भूषणप्रियापि स्नेहवशाद्भवतां पल्लवं नहि गृह्णाति स्म, भवतां नवकुसुमप्रसूतिकाले या हर्षान्विता भवति स्म, सैषा शकुन्तला स्वपतिनिकेतनं याति भवन्तोऽनुमन्यताम्, इत्यत्र शकुन्तलायाः प्रकृतेः साकम्, तपोवनप्राणिषु विहिता निर्मलव्यवहारा मानवादर्शस्यानुकरणीयाः पक्षाः सन्ति। पतिगृहगमनोद्यतां शकुन्तलां वीक्ष्य पिता कण्वः - गुरून् शुश्रूषस्व, अर्थाद् गुरुजनान् श्वशुरादीन् पूज्यान् सेवस्व, मदुक्तमुपदेशवचनं सावधानतया श्रृणु, इत्यादिभिर्वचनैस्तामनुशास्ति । तत्र प्रस्तुतमुपदेशवचनं मानवादर्शस्य विशिष्टमुदाहरणं विद्यते । साम्प्रतिकैरपि जनैस्तदनुक्रियते चेत् समाजस्य कल्याणं किं न सम्भवति ? अतोऽभिज्ञानशाकुन्तले महाकविकालिदासेन यादृशं चरितं प्रकटितं पात्राणां माध्यमेन ये ये मानवीयादर्शाः प्रकटितास्ते सर्वेऽप्यनुकरणीया मननीयाश्च विद्यन्ते।

**सन्दर्भग्रन्थसूची**


ईशावास्योपनिषद्. (२०६०). गोरखपुरः गीताप्रेस।

कालिदासः. (२०१७). **अभिज्ञानशाकुन्तलम्.** वाराणसी चौखम्बा संस्कृत सीरिज।

**तैत्तिरीयोपनिषद्**. (२०३६). वाराणसी महेश अनुसन्धान संस्थान।

गिरिः, केशवानन्दः. (२०७६). **शुक्लयजुर्वेदसंहिता**. देवघाटः गुरुकुल प्रकाशन।

गिरिः, रामानन्दः. (२०७३). **ईशादि दश उपनिषद्**. देवघाटः महेश सन्यास आश्रम।

वेदव्यासः. (२०७२). **श्रीमद्भागवतमहापुराणम्.** गोरखपुरम् गीताप्रेस।

SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion.in

# तैत्तिरीयोपनिषदि शिष्यशिक्षायामाचार्यस्यावदानम् - तदानीमिदानीं च

Dr. Rajesh Pramanik

SAMVARDHINI :- 01/12/2025
Volume - 7
Issue - 2
(ISSN ONLINE :- 2583-7176)
https://samvardhini.in

**Dr. Rajesh Pramanik**
Guest faculty
Department of Sanskrit Studies The School of Humanities University of Hyderabad Hyderabad, Telangana - 500046
Email - pramanikr071@gmail.com

**शोधसार:**

कृष्णयजुर्वेदीयस्य तैत्तिरीयारण्यकस्य सप्तमाष्टमनवमानां प्रपाठकानां नाम तैत्तिरीयोपनिषदिति कथ्यते। तत्र च सप्तमः प्रपाठकः शिक्षावल्ली, अष्टमः प्रपाठकः ब्रह्मानन्दवल्ली नवमश्च प्रपाठको भृगुवल्लीत्यस्माभिर्ज्ञायत एव। अस्याञ्चोपनिषदि नृयोनिगतसाधनब्रह्मजिज्ञासासज्ज्ञाननैतिकतागुरुशिष्यसम्बन्धादिविषयविवेचनं सोज्ज्वलं प्रकाशितम्। विशेषेण शीक्षावल्ल्यां शिष्यशिक्षायामाचार्यस्यावदानमनवद्यरूपेण प्रकाशितम्। वर्तन्ते निर्मलब्रह्मविद्यानिरूपणचित्तैकाग्रतागुर्वनुग्रहादयः शिष्याय अत्यन्तमावश्यकाः। शीक्षावल्ल्यां विविधोपासनाः शिष्याचार्यसम्बन्धिशिष्टाचाराः निरूपिताः सन्ति। विषयप्राङ्गणेऽस्मिन् ब्रह्मविद्यालाभेऽभूत्तत्परो भृगुः, व्रह्मविद्याप्त्यर्थमाजगाम च वरुणशरणम्। स च आचार्यो वरुणो ब्रह्मप्राप्तिहेतुभूतोपासनामुपदिदेश भृगवे। भृगुश्चाचार्योपदेशादेशानुसारेण यद्यदाचचार तदेव गुरुशिष्यपरम्परायाः परमदृष्टान्तमस्त्यस्मिन्संसारे। शिक्षावल्लीनामानुसारेण आचार्यसकाशाच्छिष्यस्य यादृशं शिक्षाग्रहणं तद्वास्तविकतयैवानवद्यमसाधारणमपूर्वञ्च। भृगुं प्रत्यत्राचार्यप्रदत्तशिक्षा न केवलाक्षरपरिमितापि त्वाध्यात्मिकस्वरूपा। शिक्षायाः मूलोपादानानि चैवंक्रमेणोक्तानि – अक्षरः, स्वरः, मात्रा(उच्चारणकालः), प्रयत्नः, समोच्चरणम्, क्रमिकतेति।[1] एभिरेव षड्भिर्मूलोपादानैः शास्त्राध्ययने श्रवणे मनने सद्व्यवहारिके उन्नतचारित्रगुणे च समग्ररूपेणोन्नयति शिक्षकः शिक्षार्थिनम्। पुनश्च महासंहितोक्तानां गूढार्थानां विविधलोकदीप्तमानाग्निविद्यासन्तानात्मादीनां विषये विशेषज्ञानप्रदानेन शिष्यस्योपयोगितां वर्धयत्युभयतोर्बाह्याध्यात्मिकस्तरयोः। तैत्तिरीयोपनिषदोच्यत आचार्यस्य प्रधानकर्तव्यमिदमस्ति यत्स्वशिष्यान् आध्यात्मिकमार्गे प्रेरणम्। आचार्यवरूणात् प्राप्तेनोपदेशेनोपलब्धिरियमजायत

1. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 2/1

भृगोः – अन्नं ब्रह्म, ततः प्राणः, ततस्ततः मनः विज्ञानम् इति।[2] क्रमेणान्त आनन्दमेव ब्रह्मेति विजज्ञे। इत्थञ्च तेनात्मबोधपरब्रह्मबोधयोः पूर्णज्ञानमवेदि। पुरूषस्यान्नमेव पुष्टिसाधकं पुरुषार्थसाधनसहायकमित्यत एव कदापि नान्नं तुच्छीकरणयोग्यम्। जलान्नासनादिनाभ्यर्थनायां सत्यामतिथेस्तदगृहकर्तुमानं समृद्धिश्च वृद्धिं प्राप्नोति। आनन्दादेव सृजनलयपालनरूपं कार्यं विघटत इति हेतोरेवानन्द एव ब्रह्मस्वरूपम्। अस्याञ्चोपनिषद्यन्नादारभ्यानन्दमयकोशपर्यन्तं ब्रह्मप्राप्तिविषयिकी व्याख्या दृग्गोचरीभूता भवति। यच्च जीवनस्य क्षणिकतां संस्मार्य परमसत्यस्वरूपे आत्मबोधस्वरूपे च मार्गे प्रेरयति मनुष्यान्। आध्यात्मिकशिक्षा न केवलं जागतिकसाफल्येषु सीमितापि तु तदतिक्रम्य मानवं प्रेरयति मोक्षमार्गं प्रति। यद्यपीदानीन्तने समये दर्शनचर्चायाः मार्गः रुद्धप्रायस्तथाप्यास्याः लब्धशिक्षा-समूहः जनमानसे निखिलसमाजे च चिन्तनशीलतायाः वर्धने शान्तिस्थापने आध्यात्मिकोत्कर्षे च गुरुत्वपूर्णं भारमुद्वहति।

**कुटशब्दाः**

आचार्यः, शिष्यः, महासंहिता, उपदेशः, आदेशः, अनुशासनम्, नैतिकता, ब्रह्मज्ञानम्, पञ्चकोशः।

2. तैत्तिरीयोपनिषद्, ब्रह्मानन्दवल्ली- 2/1

## आचार्यस्य द्वैतभूमिका

त्रयोऽर्थाः सन्त्याचार्यशब्दस्य। तद्यथादावेव- यः शास्त्रं शुद्धरूपेण पठितुमवगन्तुं च समर्थः सः। द्वितीयार्थस्तु, धर्मशास्त्रवेदशास्त्राचारशास्त्रप्रभृत्युक्तशिक्षानुसारेण लोकान् पालयितुं प्रवृत्तो भवति स आचार्यः। अर्थात्, मनुष्यान् शास्त्रानुसारेणाचारयति, जीवनं यापयति, नियमानुसारेण प्रावर्तयति। तृतीयोऽर्थोऽयमस्ति यत्, अन्यमनसि शास्त्रज्ञानं प्राविश्य तदनुसारेण मानयितुं ग्राहयितुमुद्बुद्धो भवति यः सः। अस्यार्थस्य तात्पर्यमिदमस्ति- स्वकीयानुष्ठानेन परप्रेरणमपि यस्य धर्मः स आचार्यः। स्वयं नाचरति परे तूपदिशति सः न आचार्यः। नैव वाचिकत्वभिन्नमन्यत्किमपि यः केवलमुपदेशमात्रं करोति। न च तज्ज्ञानम्। शास्त्रेणोच्यते, दशाध्यापकेभ्योऽधिक एक एवाचार्यः। आचार्यशतकाच्चाधिकोऽस्त्येकः पिता श्रेष्ठः। पुनश्च पितृसहस्राच्छ्रेष्ठैका माता। किमर्थमयमेव क्रम इति चेन्माताचरतीत्यत एवेत्युत्तरम्। अत्रानुष्ठानेन मातृशक्तेरनन्तरूपः पुत्रस्नेहो गृह्यते। सन्तानश्च तं मातृस्नेहमनुभवति। यत्र नास्ति कापि स्वार्थकातरता। वस्तुतस्तु शिक्षाङ्गणे एकः एतादृशः कश्चनाचार्य आवश्यको यः साक्षाच्छिक्षामूर्तिस्वरूपः। यः स्वजीवनेऽन्वभूच्छिक्षाम्। यस्य च जीवनं तच्छिष्यसमीपे साक्षात् तिष्ठति चेदेवाचार्यः सः। स एव शिष्यं स्प्रष्टुं समर्थः। स एवानुशासने सक्षमो योग्यश्च। अन्ये चापरेऽक्षमा उपदेशदाने। एतस्मादेव

श्रुत्युक्ताचारवर्जिताचार्येणास्माकं जीवनेऽप्यनुष्ठानं नैव भवति। तदेवोच्यते- **'वेदम् अनुच्च आचार्य अन्तेवासिनम् अनुशस्ति। मातरः सहस्रेभ्यः वत्सलतरा श्रुतिः।'**[3]

## महासंहितायाः ज्ञानम्

वयमिहलोके एकत्र महिम्न्येकत्र च पवित्रज्योतिष्युपनीताः सन्तः ज्ञानं लप्सीमहि। अथातः महासंहिताया उपनिषदं व्याख्यास्यामः – पञ्चस्वदिकरणेषु[4]। अत्र लोको नाम विश्वजगद्रूपेण परिव्याप्तः पृथिव्यादिः। यत्र पृथिवी प्रथमरूपा, द्यौर्द्वितीयरूप आकाश्चसन्धिरनयोर्वायुश्च सन्धिग्रन्थिः।[5] द्वितीये च दीप्तमानाग्निः प्रथमरूप आदित्योऽपररूपो जलधारा च सन्धिर्विद्युच्च तत्सन्धिग्रन्थिः।[6] तृतीये तु, विद्यायामाचार्यः पूर्वरूपः शिष्यश्चोतररूपोऽनयोर्विद्या सन्धिर्व्याख्या च विद्यासन्धिग्रन्थिः।[7] चतुर्थे मातास्ति पूर्वरूपा पिता पररूपः सन्तानः सन्धिः प्रजननञ्च सन्धेर्ग्रन्थिः। आत्मनि च प्रथमः हनुः प्रथमः रूपः निम्नहनुश्च परवर्ती रूपः वाक् च सन्धिः जिह्वा च सन्धिग्रन्थिरूपेण कथिता।[8] यो जानातीमां महासंहितां तस्मिन् सन्तानगोधनपवित्रदीप्तान्नादि संयुज्यते। अखिलान्नान्तर्गतास्तस्य, तत्कृते च स्वर्गे उच्चावस्थापेक्ष्यते।

## शिक्षोपासने

यया वर्णादीनामुच्चारणादिः शिक्ष्यते सैव शिक्षेति प्रचक्षते। अथवा यच्छिक्ष्यते तदेव वर्णाद्युच्चारणादिरेव शिक्षा। उपनिषत्पाठेष्वर्थ एव प्रधानविषयः, तत्र यदि शब्दसमूहानामुच्चारणादिकं सुष्ठुतया न क्रियते तर्ह्यर्थबोधः व्याहत एव भवतीत्यस्मादेव शिक्षोद्देश्यमपरिहार्यम्। प्रत्येकं मनुष्यस्य कृते शिक्षाध्यायगतविषयानामधिगमनमावश्यकम्। शिक्षैव मनुष्यजीवनान्धकारस्य मोचन एकमात्रसहायिका। एषा शिक्षा मनुष्यमनोगताज्ञतान्धकारान् विनश्य समाजमग्रे सारयति, तस्य कल्याणं साधयति च। एषोपनिषन्न केवलं शिक्षाग्रहणविषये वचनमातनोत्यपितु, तदात्मस्थकरणोपायापि निर्दिशति। हृदयङ्गमे निरन्तरालोचना साधनावश्यिकेति कथयति- **'अथातः संहिताया उपनिषदं व्याख्यास्यामः'**।[9] परमेश्वरस्य समीपे सम्प्रार्थ्यत आचार्यशिष्ययोः समरक्षणाय, विद्यायाः प्रसादाय, शान्त्यै च। तौ गुरुशिष्यौ परस्परविद्वेषभावं सर्वथा परित्यज्याध्यात्मिक्यभौतिकदैविकाख्यत्रिविधदुःखान् नश्यास्ताम्। एतन्मन्त्रेण प्रतीयते यदाचार्यः शिष्यश्चैकीभूय विद्याप्राप्त्यर्थमाग्रहं प्रकाशयतः। कारणमत्र

3. शीक्षावल्ली, तैत्तिरीय उपनिषद् पर आधारित, पृ. 6
4. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 3/1
5. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 3/1
6. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 3/2
7. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 3/3
8. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 3/4
9. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 3/1

ह्याचार्योऽपि विद्यादानेन स्वशिष्याय स्वयमपि समृद्धो भवति। तस्मादाचार्यशिष्ययोरेकीभवने विश्वमपि महत्कार्यं सम्पन्नं भविष्यति।

श्रुत्यानयाचार्यो ब्रह्मविद्यायाः वेदाध्ययनस्य च सर्वत्र प्रचाराय ब्रह्मचारिणः शिष्यान् आह्वयति। वैदिकाश्चार्षयः सर्वेऽप्यासन्नेकैकशाः आदर्शयुक्ताः शिक्षकाः। ते शिष्यान् उपदिदिशुः- **'प्रतिवेशोऽसि प्र मा पाहि प्र मा पद्यस्व'**[10] इति अर्थात् उभेऽपि परस्परभावेन परस्परयोर्मध्ये प्रविविक्षतः। परस्परान्तगतता नाम चैकात्मताप्राप्तिः। उपास्यदेवतया सहैकात्मकत्वप्रापणमेवोपासकस्य सर्वोच्चसिद्धिः। न केवलं गुरुशिक्षसम्मिलितत्वकार्योपदेशकत्वचोदनमपि तु विश्वजनसम्मानसतयैकत्वभावेन कर्मसम्पादनस्य मार्गमपि प्रदर्श्यत अनयोपनिषदा। तैत्तिरीयोपनिषदनुशीलेन स्पष्टं भवति यच्छिक्षाधुनिकसमाजे कियदपरिहार्यत्वेन गौरवमुद्धरति। बहूपदेशप्रपूरितोपनिषदोऽस्याः सर्वानामप्युपदेशानामस्ति गभीरतात्पर्यं माहात्म्यं च। यादृशेनायं वर्तमानसमाजः अधोगच्छति , ततः मुक्त्युपायोपदेशेऽस्याः उपनिषदः गुरुत्वमनस्वीकार्यम्।

## शिष्यानुशासनम्

समीपादाचार्यस्य दीक्षाग्रहणादनन्तरं नवजन्मरूपं जीवनाध्यायं प्रारभते शिष्यः। अस्मिन्नध्याये चाचार्यसकाशादुपदेशरूपं मूलमन्त्रमधिगच्छति तच्छिष्यः, यच्चोपदेशरूपं तदादेशात्मकम्। स एवोपदेशात्मकादेश एवानुशासनम्। तदनुशासनं मानवजीवनयज्ञभूमौ मूलचालिकाशक्तिस्वरूपमेव। बाह्यिको हव्यो यज्ञो वा प्रतीकमात्रिकोऽस्ति। जीवनयज्ञे दीक्षाग्रहणायैवावश्यकतास्ति शिक्षायाः। अनयैव जीवनयज्ञस्य परिचलनं सम्भवति। जीवनयज्ञनिर्वहणविधिनियमा एवाचार्यैरुच्यन्ते। वैदिकाचार्योक्तानुसारेणैव **'एव चैव उपास्यम्'**[11] इत्यादिधर्ममार्गस्यानुसरणं करणीयम्। वस्तुतस्तु दण्डो वा करुणा वोभावेवेश्वरस्य कर्म इत्यतोऽस्तीश्वरनिष्ठाभक्तीश्वरदृष्टिभिर्मनसो विलीनं करणीयम्। एषैव यथार्थशिक्षा संविद्धारणा च।

## नैतिकशिक्षा

अनन्तरं ब्रह्मचर्यजीवने यथार्थवेदाध्यायनाद्गार्हस्थाश्रमे कथं सम्यग्रूपेण निर्वहणं कार्यं मनुष्यस्येत्येतन्नैतिकविषये शास्ति गुरुदेवः – **'सत्यं वदे'**ति[12] अर्थात्, आत्मसत्यता पालनीया। गुह्यञ्चैका प्रक्रिया। **'धर्मञ्चर'**[13] इति। अर्थात्, यद्वा कर्म भवतु, तद्धर्मसंगतत्वे सति करणीयमन्यथा वर्जनीयम्। परमसत्यस्वरूपस्य परब्रह्मणः प्राप्त्यर्थमेषैवास्ति व्यवहारिक्यस्थायी व्यवस्था च। सत्याचरणे

10. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 4/3
11. शीक्षावल्ली, तैत्तिरीय उपनिषद् पर आधारित, पृ. 39
12. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 11/1
13. तदेव

सति सम्भवत्यात्मदर्शनम्। सर्वं च सम्भवत्यात्मदर्शनेन। एतच्चात्मदर्शनमस्ति परमधर्मस्वरूपम्। तथापि धर्मान्तर्निहिते सत्यवचने शङ्काभवति। को नाम धर्मः? का वास्य पालने पद्धतिरस्ति? देवालयस्थदेवाराधनैव धर्म उत एकादशीपालनम्? इत्येवंप्रश्ने इत्येवं वक्तुं शक्यते यदेतत्स्थूलनियमादयः पुण्यप्राप्तिहेतवो भवितुमर्हन्ति किन्तु पालनकारी धार्मिक एव भवतीत्यत्र नास्ति निश्चयता। यो धरति जीवनं पालयति च स एव धर्मः। तथा च **'धर्मान्न प्रमदितव्यम्'**[14] इत्यस्ति। अर्थात्, धर्मान्न विमुखो भवनीयः। धर्मशब्दस्यानुष्ठेयकर्मविशेषेऽस्ति तात्पर्यम्, अतः एव तदननुष्ठानमेव प्रमादः। तेन सततं धर्मानुष्ठानं करणीयम्। तथा पुष्पस्पर्शानन्तरं वायुः सुगन्धिमातनोति दिशि दिशि, तथैव धर्मोऽपि सत्यस्वरूपः मानवकल्याणकरः सन् सर्वत्र विराजते। मनुष्यः कदापि न धर्मं विस्मरेत्। धर्मसहायकेनैव मनुष्यस्य कर्ममार्गपरिचयो भवति। दुर्जनकृतदुष्टकर्मसमूहात्स्वस्य स्वपरिवारस्य स्वसमाजस्य च संरक्षणं सज्जनकृतसुकृत्या च पावनत्वं महत्त्वपूर्णमस्ति। अस्मिन्प्रसङ्गे स्वामिपादस्य विवेकानन्दस्य वाणीयं प्रामाणिकी – 'For the world can be good and pure, only if our lives are good and pure. It is an effect, and we are the means. Therefore, let us purify ourselves. Let us make ourselves perfect.'[15]

## धर्माधारे जीवनस्य निर्माणम्

अस्मदार्योक्तोक्तिरियम्, निर्माणीयं धर्माधारेण जीवनमिति। भगवती श्रुतिश्चाचार्यमुखनिसृता सति कृतियशस्वि तेजस्वि च जीवनमुपस्थापयति। कलियुगप्रारम्भश्च सममेव समन्वितं कृष्णकृष्णदैपायनवेदव्यासाभ्याम्। नवावतारेण भगवता नवधर्मस्याधारं व्याख्यां च प्रस्तौति स्म। सत्यमिदमस्ति धर्मस्य वीजम्। तत्सत्यवचनाच्चोत्पन्ना भवति धारणा। धर्मः प्रकटीभवति च कर्मणा। कर्म च सिद्धति परोपकारेण। तस्माद्धार्मिकजीवने कौशलकर्म विभूतिकर्म भवेत्। धर्मपालनेन सह जीवनयापनमेवकुशलकर्मगार्हस्थस्य।धर्मायकर्मकुशलकर्मचात्मरक्षणाय।कामार्थयोर्विकाशेलोभक्रोधौ शत्रुरूपेण प्रतीयेते। तथा च कामपूर्तिसम्भवे लोभस्य क्रोधस्य च पूर्तिसम्भावाभावे कामस्य प्रादुर्भावः। कामक्रोधलोभत्रयमेतन्नरकस्य द्वारम्। अहंकारेणोल्लङ्घनं भवति धर्मस्य[16]। श्रेष्ठपुरुषसंसेवने सति कामक्रोधलोभैर्मुक्तिर्भवति। तथापि लोभोऽनन्तरूपेण प्रतीयते। मनुष्यो लोभप्रधानः, देवश्च कामप्रधानः, दानवश्च क्रोधप्रधानः।[17] एतस्मादेव मनुष्यस्य मुख्यधर्मोऽस्ति दानम्। यच्च श्रद्धासमन्वितं भवेत्। धर्मवृक्षेण दयया दानेन च शश्वद्देदीप्यते। श्रद्धातश्च धर्मः कर्म च सम्पूर्णं भवति। अतः एव यानि कर्माणि करणीयानि तानि शास्त्रोक्तानि भवितव्यानि। विपदापद्यद्वापतेत्तथापि कर्तव्यकरणे सत्यस्वभावेन तपोमूलेन च द्रष्टव्यं

14. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 11/1

15. www.ramkrishna.org

16. तैत्तिरीयोपनिषद्, शीक्षावल्ली, चतुर्थ अनुवाक, पृ. 35

17. शीक्षावल्ली, तैत्तिरीय उपनिषद् पर आधारित, पृ. 65

सर्वम्। ये चाचार्या अध्ययनमध्यापनं च कुर्वन्ति वेदस्य, न तेषां सीमास्ति अध्ययनाध्यापनपर्यन्तमपि तु तदतिरिच्यापि कर्तव्यं शास्त्रविहितमार्गानुसरणम्। न कर्तव्यं शास्त्रविधिवर्जितकर्मणि प्रवर्तनम्। न केवलमिदमुपदेशकर्तुराचार्यस्यावगन्तव्यस्य विषयोऽपि तूपदेशश्रोतृणामवगन्तव्यस्य विषयः। धर्म एवास्माकं सर्वेषां जीवनस्याधारः। जीवनं धर्ममयं भवति विधिनियमचर्ययैव। एतदर्थमेवावोचन्मनुः – **'आत्मदर्शनमेव परमो धर्मः'**[18]। सम्बन्धसूत्रस्य तिरस्कारनिषेध उच्यते- **'प्रजातन्तुं मा व्यवच्छेत्सीः'**[19] इति अर्थात् सम्बन्धो भवति तन्तुग्रथितवस्त्रवत्। तन्त्वपसरणे वस्त्रसंकटवदेवास्ति प्रजासंकटः। इत्थञ्च प्रजां निर्माति शिक्षासमन्वितत्वेन संस्कृतसंयुक्तत्वेन। शाश्वतोऽयं सम्बन्धो मानवजीवनं समाजं चाङ्गाङ्गिभावेन संयोजयति।

## सामाजिकशिक्षा

तैत्तिरीयोपनिषद्ययमपरो गुरुत्वपूर्णो विषयोऽस्ति- गुरुशिष्यसम्पर्कस्य सामाजिकी शिक्षा। न केवलमाचार्यः प्रेरयति स्वशिष्यं केवलस्वकीयसाधनमार्गे, तेन साकं सामाजिकाचरणे कर्तव्येऽपि दीक्षां प्रददाति। मातृपितराचार्यातिथिपूजने प्रमादो न करणीय इत्यपि शिक्षयति। एते पूजनीया नाम सर्वेऽपि देववदेवोपास्याः। पितरावस्माकं जन्मदातरौ पालकपोषकौ, आचार्यश्चास्माकं प्रशिक्षकोऽतिथिश्च गृहागमनेनान्वयनामकं करोति गृहम्। जीवनसकलकलायामावश्यकमेतेषाम्। न केवलं माता पिता आचार्यश्च प्रत्यक्षदेवता, एतेषां विशेषपूजागौरवप्रचाराय पृथक्प्रणाममन्त्रा अप्युल्लिखिताः।

प्रगाढरुचिरस्त्यधुना धनसम्पत्तौ मनुष्यसमाजे मनुष्यस्य। श्रद्धाभावस्यार्थसंकटश्चागतोऽधुना। तन्निमित्तमेव चतुर्दिशि दृश्यते- पितृभ्यां सह सन्तानस्य दुर्व्यवहारः, गुरुषु पूजनीयेषु सम्मानाभावः शिष्यस्य, अतिथिश्चावमानितः। पित्रोरत्यन्तप्रयोजने निर्गमयति वृद्धाश्रमं सन्तानः। किमेतदेवास्माकमुचितं कार्यम्? धनं वा सम्पद्वा न सर्वस्वस्वरूपास्ति जीवने। यदाचर्यतेऽस्माभिरतिथिभिर्गुरुभिः पित्रा मात्रा सहाद्यः श्वस्तदेवास्माकं स्कन्धे आपतिष्यति। समयः नापेक्षते कस्यचित्कृते। अत एवास्माकं सम्यक् विविच्य कर्म करणीयम्। स्वसम्मानाकाङ्क्षास्ति चेदादावन्ये सम्माननं करणीयम्। सदाचाररक्षणाय गुरुजनेषु श्रद्धाचला संस्थापनीया, तद्गतादर्शोऽनुसरणीयश्च। तस्मात्प्रर्तमानावाञ्छिताचारणनिवारणायोपदेशस्यास्य प्रचार आवश्यकः– मातृदेवो भव पितृदेवो भव आचार्यदेवो भव अतिथिदेवो भव इति।[20]

श्रद्धया दानं करणीयमश्रद्धया न। तत्रापि श्रद्धापरिपूर्णदानेऽपि प्रमादो न कार्यः इत्येतच्छिक्षैवास्माकं यथार्थज्ञानमार्गे प्रेरयति। यज्ज्ञानमेतदस्यामुपनिषदि निहितमस्ति।

18. मनु- 10/108
19. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 11/1
20. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 11/2

प्रसङ्गेऽस्मिन्स्वामिविवेकानन्दोऽवोचत्- Do not stand on a high pedestal and take five cents in your hands and say, 'Here my poor man'; but be grateful that the poor man is there, so that by making a gift to help yourself. It is not the receiver that is blessed, but it is the giver. Be thankful that you are allowed to exercise your power of benevolence and mercy in the world, and thus become and perfect.[21]

अर्थगतसहायता वा कायिकसहायता वा भवतु सर्वत्रान्तरिकभावेन श्रद्धासमन्वितेन करणीयास्माभिः। दानञ्चास्माकं धनसम्पदासक्तिनिर्मोचनसहायकमस्ति। न कदापि दानं साहंकारेण कर्तव्यम्, नापि धूर्ततया। असहायस्य दानेन साहाय्येनास्माकं मनःपूतिर्भवति, तद्व्यक्तेरुपकारोऽपि भवति। फलस्वरूपेण कार्यमिदं नवप्रजन्म प्रति नवदिशामुन्मोचयति, आशां च सञ्चारयति। सर्वेषामपि सम्पर्कानां मर्यादायाः रक्षणं कर्तव्यस्य च पालनं शिष्याणां नैतिकदायित्वम्।

## आध्यात्मिकशिक्षा

तैत्तिरीयोपनिषदनुसारेणाचार्यस्य करणीयेषु महत्वपूर्णं दायित्वमस्त्याध्यात्मिकजीवनस्य मार्गप्रदर्शनम्। आध्यात्मिकतानुसन्धानहेत्वर्थे वरुणस्याचार्यस्य समीपे भृगावागते सति ब्रह्मज्ञानलाभोपायः उपदिदेश। तत्रेदमुक्तं यन्न केवलं बाह्यज्ञानविषयेषु पार्थिवज्ञानेष्वेवान्तर्भुक्तिः स्यादपि त्वन्तर्मुखिज्ञानजगत्प्रत्यपि चलनं भवेत्। एतदेवान्तर्मुखिज्ञानमादावन्तर्बोधे नयति, तदनन्तरं ब्रह्मज्ञाने। अस्मच्छरीरमिदं अन्नमयं प्राणमयं मनोमयं विज्ञानमयमानन्दमयमिति कोशपञ्चकेन निर्मितम्। अस्याञ्चोपनिषद्यन्नमेव ब्रह्मज्ञानलाभे आदिमं द्वारम्। अन्नमेव ब्रह्मेत्यतोऽनिन्दनीयमन्नं, न तुच्छीकरणयोग्यमन्नम्। यतो ह्यन्नमेवास्माकं देहरक्षावीजम्, पुष्टिहेतुकञ्च। प्राणोऽप्यन्नेनैव पुष्यते शरीरे। शरीराभावे न सिद्ध्यति कोऽप्येकः पुरुषार्थः। अस्माकं जन्मभूमौ एतादृशाः केचन जनाः सन्ति ये जीवनधारणायान्नं न प्राप्नुवन्ति पर्याप्तत्वेन, किन्तु केचन विना विचारितेनान्नमवमिमीते। यत्र गण्डुषपरिमितेनान्नेन कस्यचित्क्षुन्निवृत्तिः सम्भवति। अतोऽन्नं नानादरणीयम्। अस्मद्गृहागतेऽवमाननं न कर्तव्यम्, नानुपेक्षणीयम्। सामर्थ्यानुसारेणान्नपानासनादिनाभ्यर्थना कार्या। अनयैव गृहस्थो भवति अन्नवान् कीर्तिमान् प्रजापशुब्रह्मतेजःसमृद्धः। इत्थञ्चान्नमाहात्म्यं वर्णयित्वा भिन्नाश्रये भिन्नरूपेणोपासनां विदधाति- 'अन्नं न निन्द्यात्। तद्व्रतम्। प्राणो वा अन्नं शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणः प्रतिष्ठितः। तदेतदन्नमन्ने प्रतिष्ठितम्।'[22]

तदनन्तरं पितुर्वरुणस्योपदेशमनुसृत्य मन एव ब्रह्मेति निचिचाय। यतो हि मनस एव भूतानि

21. www.greenmesg.org
22. तैत्तिरीयोपनिषद्, भृगुवल्ली- 7/1

सर्वाण्युत्पद्यन्ते जातानि च मनसैव जीवन्ति। अन्ते च मनस प्रलयं यान्ति तानि, पुनश्च मनस एव सर्वाणि प्रविशन्ति। पितुरुपदेशेन पुनः स एव भृगुः विज्ञानं ब्रह्मेत्यचिनोत्। विज्ञानादेव उत्पन्ना भवन्ति, भवन्ति च जीवन्ति। अन्ते च तस्मादेव निर्गत्य विज्ञान एव सर्वाणि प्रविशन्ति। इत्थञ्च लब्ध्वा ज्ञानं पुनर्निवेदयामास गत्वा स्वकीयं निर्णयं स्वपितरं वरुणम्। इतःपरं पितुरुपदेशानुसारेण विविच्य सम्यक्तयानन्दमेव ब्रह्मेत्यचैषीद्भृगुः। यतो ह्यानन्दादेवोत्पद्यन्त इमानि सर्वाणि भूतानि। आनन्देनैव जीवन्त्यन्त आनन्दे एव प्रलीयन्ते, इत्थम्भूतप्रकारेण ब्रह्मज्ञानसाक्षात्कारेण स परब्रह्मणः पूर्णविद्यां लेभे। एषा एव भृगोर्ज्ञाप्तिः, एषा च वरुणोपदिष्टा विद्या।

यः कोऽपि साधको भृगुवत्तपसा परिशुद्धचित्तः सन् एवंप्रकारेण विचिन्त्य परमानन्दमयं परब्रह्म परमात्मानमुपलब्धुं सक्षमो भवति सोऽपि तस्मिन्नेव विशुद्धे परमानन्दस्वरूपे परमात्मनि प्रतितिष्ठति। एतद्विहायाप्यस्मिल्लोकेऽपि सोऽन्नवान् भवति, अन्नजरीकरणेऽपि समर्थो भवति, सन्ततिपशुब्रह्मतेजोमहद्यशोभिः समृद्धो भूत्वा महतां मध्ये महनीयो भवति। एतस्मादुपनिषतोऽत्यन्तं सजीवसुन्दरं शिक्षाजीवनदर्शनं निरूपितम्। अत्रान्नादारभ्यानन्दपर्यन्तं ब्रह्मचैतन्यस्य क्रमविकाशः, आनन्दमीमांसा च सुस्पष्टतया विवृता। अतोऽवगम्यते यदानन्दादेव जगतः सृष्टिस्थितिलयाः भवन्ति। जीवनं हि शश्वत्परिवर्तनशीलमस्ति। योऽद्य युवा, स एव श्वो वृद्धो भविष्यति। यश्चाद्य वृद्धः सः कालधर्मेण पञ्चत्वं गमिष्यति। तस्मादस्माकं जीवनं सदैवानन्देन यापयितव्यम्।उपनिषदेषानन्दप्राप्तिमार्गं दर्शयित्वात्मानं समृद्धं करोति, मानवजीवनं च पूर्णतायां नयति। आचार्यः शिष्यं शिक्षयति—जगतोऽस्य नश्वरतां ज्ञात्वा परमात्मानुसन्धानीयः। इत्थञ्च शिष्यः गुरूपदेशेन जीवनस्योद्देश्यमवगच्छति यत्, एतत्तत्त्वं न केवलं लौकिकसफलतायाम् अन्तर्भवत्यपि तु मोक्षस्वरूपे परमपुरुषार्थे प्रतिष्ठापयति। आध्यात्मिकी शिक्षा नाम लौकिकज्ञानसीमामतीत्य स्वशिष्यं परमसत्यस्यात्मबोधस्य चानुभूतौ नीयमानप्रक्रिया। सम्प्रत्यगणितैः राजनैतिकैः अर्थनैतिकैश्च मतैः घोरं जालं प्रसृतम्, येन पूर्वे ये महान्तः दार्शनिकमतप्रवर्तकाः ये चास्माकं व्यक्तिजीवने सामाजिकजीवने च चिन्तनशीलतायाः आध्यात्मिकतायाः उत्कर्षणं साधयामासुः तेषां चर्चाः शनैः शममगमन्। तस्मादेव हेतोः समाजे रागद्वेषहिंसाप्रतिहिंसाः प्रवृत्ताः दृश्यन्ते प्रबलाकारेण।

## उपसंहारः

प्रागैतिहासिककाले वैदिकयुगे शिक्षासीत् गुरुकुलपरम्परानुसारिणी। तदाचार्याः बहुयत्नेन क्षार्जनगुरुकुलवासनियमश्शृङ्खलाशास्त्राध्ययनशीलशालिनताचारनिष्ठादिविषयकविविधविद्यासमन्वित विद्याभिः पुस्तकगतविद्यया नीतिसामाजिकधर्मशिक्षाभिश्च सत्यवचनधर्माचरणसद्व्यवहार-प्रवृत्तिभिः प्राज्ञान् कुर्वन्ति स्म स्वशिष्यान्। सहैव लौकिकविद्ययाचार्यः शिष्यं शिक्षयति ब्रह्मविद्यां परमयत्नेन। यच्च मनुष्यशरीरान्तर्निहितान्तरिन्दियं मनोऽन्तरात्मानं चाध्यात्मिकमार्गेऽग्रगमनं

सरलत्वेन साधयति। यद्यपीदानीन्तनी शिक्षाव्यवस्थोन्नता,विहाय श्रुतिपरम्परामाधुनिकज्ञान-विज्ञानस्य कल्याणेन परीक्षानिरीक्षयोपयोगिनां विविधवस्तूनामुत्पादनमभवत्तथापि मनुष्यस्य या विवेकनीतिनैतिकसद्व्यवहारश्रद्धाविनम्रसमन्विता शिक्षा सा विलीयमानेव। सम्प्रति नवशिक्षापद्धतौ यन्निर्दिष्टं पाठ्यक्रममस्ति, तदवश्यं ग्राह्यमेव। कुतः इति चेदिदं वक्तव्यं समाजं राष्ट्रं च अग्रे नेतुं, विदेशैः सह सममानंसंस्थापयितुंचात्यावश्यिकेयंनूतनाशिक्षापद्धतिः।किन्त्वत्रनीतिशिक्षापिसंयोजयेत्।शिक्षयोच्चपदं तु याति मनुष्यः परन्तु कुत्राधोगच्छत्यद्य मनुष्यत्वम्? सर्वोपर्यस्यैव प्रश्नस्योत्तरमन्वेषणीयमस्माभिः। आधुनिकतया सममेव समगत्या संस्कृतसंस्कृत्यादिभारतीयपरम्परागतशास्त्राध्ययनमवश्यमेव कार्यम्। तेनैव **'मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव'**[23] इत्येतादृशैरुपदेशवाक्यैरनुशासनं, नैतिकताबोधः मनुष्यत्वबोधश्च चिरन्तनं भविष्यतीति शम्।

**सन्दर्भग्रन्थाः**


1. *तैत्तिरीयोपनिषद्* (शाङ्करभाष्यसहितः), घनश्यामदासः जालानः, गीताप्रेसः, गोरखपुरः ।
2. ईश्वरानन्दरिरिः, स्वामी, *शिक्षावल्ली(तैत्तिरीयोपनिषदेन आधारितः),* संवित्-साधनायनः, सन्त-सरोवरः, आबु-पर्वतः – 307 501 (राजस्थानः)।
3. Sastri, Mahadeva, *Taittiriya Upanishad* with Sankaracharya, Suresvaracharya, Mysore, Printed at The G.T.A. Printing Works, 1903.
4. Sharvananda, Swami, *Taittiriya-Upanishad* (with Sanskrit Text, English Rendering and Comments), The Ramkrishna Math, Mylapore, Madras, 1821.
5. Justananda, Swami, *Taittiriya-Upanishad* (Sankara-Bhashya), Udvodhan Kariyalaya, Kolkata.


**अन्तर्जालसन्दर्भाः**


6. Green Message - Evergreen Messages of Spirituality, Sanskrit and Nature. दिनाङ्कः 08.11.2025, समयः 2: 30 p.m.
7. www.ramkrishna.org. दिनाङ्कः 08.11.2025, समयः 2:53 p.m.


23. तैत्तिरीयोपनिषद्, शीक्षावल्ली- 11/2

SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion.in

SAMVARDHINI :- 01/12/2025
Volume - 7
Issue - 2
(ISSN ONLINE :- 2583-7176)
https://samvardhini.in

# भौमोत्पातानाम् अभिज्ञाने संहिताशास्त्रस्य भूमिका

**डॉ. वैजयन्तीमाला**

**शोधसारः**

भौतिकवादस्य विकासवादस्य च सिद्धान्तानेव सर्वाग्रे संस्थाप्य तदनुसरणं कुर्वतः आधुनिकजगतः प्रकृतिविषयकस्नेहः अपगत एव इति प्रतीतिर्भवति। तस्मादेव अस्मत्परितः दृश्यमानानां तथाकथितविविधविकासकार्याणां परिणामतः नानाविधसौख्यप्राप्तिस्तु जायते किन्तु प्रकृतेः महान् अपघातः अनेन सम्भवति इत्यपि सर्वविदितमेव। किञ्च स्वीयनानाविधावश्यकतानां परिपूर्तये कियदपि दौष्ट्यमाचरितुं सिद्धः दृश्यते मानवः। प्रकृतिविषयकघोरापराधकारणात् स्वसौख्यसम्पादने च विधीयमानपापवशाच्च नानाविधाः समस्याः उद्भूयमानाः सन्ति। तद्यथा-वैयक्तिक-शारीरिक-पारिवारिक-आर्थिक-सामाजिक-भौगोलिकादयः। इत्थम् अतिसूक्ष्मतः अतिस्थूलं यावत् येषां विषयाणां समाधानम् अस्माकं पार्श्वे नास्ति तान् वयं समस्यान्तर्भूतेषु तत्त्वेषु स्थापयामः। प्रायः एतासां समस्यानां खगोलीयोत्पातैः सह कश्चन विशिष्टः सम्बन्धः वर्तते इति अस्मत्पूर्वजानाम् आचार्याणां कथनम्। ते सम्बन्धा एव अस्मिन् शोधपत्रे प्रस्तूयन्ते।

**डॉ. वैजयन्तीमाला**
वरिष्ठ-शोधच्छात्रा
(PDF Research Scholar),
केन्द्रीय-संस्कृत-विश्वविद्यालयः,
नई-दिल्ली
Email -
vaijayantimala321@gmail.com

ज्योतिश्शास्त्रस्य संहितास्कन्धे त्रिविधानाम् उत्पातानां वर्णनं वर्तते। तद्यथा - दिव्य-अन्तरिक्ष-भौमाश्चेति। एते दिव्य-अन्तरिक्ष-भौमोत्पाताः कदा किमर्थं च भवन्ति इति अस्मिन् विषये बृहत्संहितायामुक्तम् यत् –

**अपचारेण नराणामुपसर्गः[1] पापसञ्चयाद्भवति।**
**संसूचयन्ति दिव्यान्तरिक्षभौमास्त उत्पाताः॥[2]**

अर्थात् मनुष्याणामविनयेन पापानि सञ्चितानि भवन्ति। पापैः उपद्रवाः जायन्ते। दिव्य-अन्तरिक्ष-भौमोत्पाताश्च तान् उपद्रवान् संसूचयन्ति। भद्रबाहुसंहितायामपि वर्णितमस्ति -

**यः प्रकृतेर्विपर्यासः प्रायः सङ्क्षेपाद् उत्पातः।**
**क्षिति-गगन-दिव्यजातो यथोत्तरं गुरुतरं भवति[3]॥**

अर्थात् प्रकृतेः विरुद्धस्वभाव एवोत्पातः। एते भौम–अन्तरिक्ष–दिव्योत्पाताः क्रमशः उत्तरोत्तरं पीडादायकाः भवन्ति इति।

वयं वर्तमाने यासां समस्यानां सम्मुखीकरणं कुर्मः ताः समस्याः भौमोत्पातान्तर्गताः भवन्ति। अपर्वणि चन्द्रादित्यग्रासादिः दिव्योत्पातः, उल्कापातनिर्घातादिः आन्तरिक्ष्योत्पातः, चद्वस्तु स्थिरं, स्थिरवस्तु चलत् यदा भवति तदा तद् भौमोत्पातः भवति इति[4]। भट्टोत्पलविवृत्त्यामाचार्यगर्गस्य कथनमिदं वर्तते यत् -

**स्वर्भानुकेतुनक्षत्रग्रहताराकेजेन्द्रजम्। दिवि चोत्पद्यते यच्च तद्दिव्यमिति कीर्तितम्॥**
**वाय्वभ्रसन्ध्यादिग्दाहपरिवेषतमांसि च। खपुरं चेन्द्रचापं च तद्विन्द्यादन्तरिक्षजम्॥**
**भूमावुत्पद्यते यच्च स्थावरं वाथ जङ्गमम्। तदेकदैशिकं भौममुत्पातं परिकीर्तितम्॥**

सामसंहितायामपि प्रतिपादितं वर्तते –

**दिव्यं ग्रहर्क्षजातं भुवि भौमं स्थिरचरोद्भवं यच्च।**
**दिग्दाहोल्कापतनं परिवेषाद्यं वियत्प्रभवम्॥**

भौमोत्पातेषु मुख्यरूपेण अवर्षणम्, अतिवर्षणं, चक्रवातः, प्रचण्डवातः, उष्णवातः, तडितझंझा, मेघपतनम्, अग्निपर्वतुत्क्षेपः, दावाग्निः, भूकम्पः, भूक्षरणम्, शीतूर्मिकाः, सुनामी, महापूरः, महामारी,

---

1. अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्मतः। नरापचारान्नियतमुपसर्गः प्रवर्तते॥ बृ०सं०,४६.२(भट्टोत्पलविवृत्तिः)
2. बृहत्संहिता ४६.०२
3. भद्रबाहुसंहिता ०२.०४
4. दिव्यं गृहर्क्षवैकृतमुल्कानिर्घातपवनपरिवेषाः। गन्धर्वपुरपुरन्दरचापादि यदान्तरिक्षं तत्॥
भौमं चरस्थिरभवं तच्छान्तिभिराहतं शममुपैति। नाभसमुपैति मृदुतां शाम्यति नो दिव्यमित्येके॥ बृ० सं० ४६.०४-०५

आतंङ्कवादः, साम्प्रदायिकता, वाहनदुर्घटनाद्यन्तरभूताः भवन्ति। वयं भौमोत्पातं मुख्यरूपेण पञ्चसु विभागेषु विभक्तुं शक्नुमः। यथा- वायुमण्डलीय-भौतिक-जलीय-जैविक-सामाजिकश्च।

| वायुमण्डलीयः | भौमिकः | जलीयः | जैविकः | समाजीकः |
|---|---|---|---|---|
| अनावर्षणम्<br>अतिवर्षणम्<br>चक्रवातः<br>प्रचण्डवातः<br>उष्णूर्मिकाः<br>ताडितझंझादि<br>मेघपतनम् | अग्नि-<br>पर्वतुत्क्षेपः<br>दावाग्निः<br>भूकम्पः<br>भूस्खलनम्<br>भूक्षरणम् | शीतूर्मिकाः<br>सुनामीः<br>महापूरः | दुर्भिक्षम्<br>औद्योगिक-दुर्घटना<br>महामारी यथा - डेंग्यू (Dengue), एचआईवी, मैडकाऊरोगः, बो-वाइन-स्पांजिफार्म एनसिफालो-पैथी, बर्डफ्लु, कोरोना (कोविड-19) इत्यादि | आतंङ्कवादः<br>साम्प्रदायिकताः<br>वाहनदुर्घट-नादि-(सड़क-रेल-हवा-ईपरिवहन दुर्घटनादिश्च (Road, Rail and Air Accidents) |

संहिताग्रन्थेषु अमीषां भौमोत्पातानां तन्नाम विविधसमस्यानां निरूपणं कृतं वर्तते तेषां केषाञ्चिदेव विवरणं ग्रन्थानुसारमत्र प्रस्तोष्यते –

## वायुमण्डलीयभौमोत्पातानां ज्ञानम्

### अवर्षणम् –



वृष्ट्याभावः वृष्टिहानिर्वा अनावृष्टिः उच्यते। यदा प्राकृतिकपारिस्थितिकतन्त्रे जलाभावात् कृष्याद्युत्पादने न्यूनता भवेत् तथा परिणामस्वरूपेण पारिस्थितिकतन्त्रं क्षतिग्रस्तं भवेत् तदा अनावर्षणाख्योत्पातः भवति। यथोक्तमाचार्यैः -

**ऐन्द्रस्य शीतकिरणो मूलाषाढाद्वयस्य चायातः।**
**याम्येन बीजजलचरकाननहा वह्निभयदश्च॥**[5]

एतदनुसारं यदा चन्द्रः ज्येष्ठ-मूल-पूर्वोत्तराषाढादिनक्षत्राणां दक्षिणभागात् सञ्चरेत् तदा बीज-वन-जलप्राणिनां विनाशं करोति। तथा अग्निभयमप्युत्पादयति। एवमेव अपरग्रहयोगे उच्यते यत् गुरुः शुक्रः

5. बृ. सं. ०४.०५

पश्चिमपूर्वयोर्दिशोः परस्परं यदि सप्तमराशिगौ भवतः  तदा तस्मिन् काले जनाः रोगैर्भयेन शोकेन दुःखेन च पीडिता भवन्ति तथा अनावर्षणकारणादपि पीडिता भवन्ति।[6] अस्याः एव अनावर्षणसमस्यायाः निरूपणम् एवं क्रियते वनमालायाम् यत् आषाढशुक्लपूर्णिमायां सूर्योदयास्ते अप्रतिहतवेगेन वायुः चलति, तदा तस्मिन् वर्षे सर्वत्र वृष्टेरभावः जायते इति। तद्यथा -

**असुरकोणभवः क्षणदामुखे वहति चेदनिलो विनलोऽम्बुदः।**
**अतिकराल-कपालकुलावृता वसुमती रुदतीव विलक्ष्यते॥**[7]

**अतिवर्षणम्**



यदा अतिवृष्टिकारणात् जनधनहानिः कृष्यादिविनाशः परिलक्ष्यते तदा सः अतिवर्षणोत्पातः अस्ति इति अवगन्तव्यम्। तल्लक्षणमेवमुच्यते भद्रबाहुसंहितायाम्-सार्धसप्त-अहोरात्रं यावद् नियमितरूपेण यस्यां कस्यामपि दिशि वायुः वहति, तदा महाभयम्, अतिवृष्टिश्च भवति।[8] आचार्यवराहमिहिरानुसारं ये मेघाः गर्भकाले प्रचण्डैर्दिवाकरकिरणैः अभितापिताः, स्वल्पपवनैश्च सम्पन्नाः भवन्ति तदा ते प्रसवकाले पञ्चनवति-दिवसशतकाले क्रुद्धा इव धाराभिरुत्सृजन्ति।[9]

**चक्रवातः, प्रचण्डवातः**



---

6. गुरुर्भृगुश्चापरपूर्वकाष्ठयोः परस्परं सप्तमराशिगौ यदा।
   तदा प्रजा रुग्भयशोकपीडिता न वारि पश्यन्ति पुरन्दरोज्झितम्॥ बृ.सं.,०९.३७
7. वनमाला ०१.१५
8. सप्तरात्रं दिनार्धं च यः कश्चिद् वाति मारुतः। महद्भयं च विज्ञेयं वर्षं वाऽथ महद् भवेत्॥ भ०सं०,०९.४१
9. रुषिता इव धाराभिर्विसृजन्त्यम्भः प्रसवकाले। बृ०सं०,२१.२४

प्रचण्डतापूर्वकं मारुतस्तम्भः अर्थात् यदा वायुः बहिर्भागात् केन्द्रं प्रति भ्रमन् ऊर्ध्वाकारेण उतिष्ठेत् तदा सः वायुः चक्रवातः अथवा प्रचण्डवातोत्पातनाम्ना ज्ञायते। एतस्य केन्द्रे न्यूनवायुभारः तथा परितः उच्चवायुभारः भवति। तथा वायोः क्षितिजलम्बवतोभयविधा गतिः तीव्रा भवति, यस्मात् ताडित्-झंझया सह अतिवृष्टि-ओलावृष्टिश्च भवति। तथा एतस्य प्रतीघण्टात्मकगतिः ९० – १२५ कि०मि० दृष्टं वर्तते।

खगोलीयघटनानुसारं स्थितिः तदा एवं भवति- अर्थात् यदा सूर्यपुत्रशनिः मीनराशौ गच्छति तदा तस्मिन् काले जनाः क्षुभिता भवन्ति, भुवि भ्रमणशीला भवन्ति, तस्कराणां समूहः हर्षितः भवति, बुद्धिजीविनां मतिः भ्रष्टा भवति, जनपदानां हरणं भवति, मेघः विचित्रवृष्टिञ्च करोति, सूर्यचन्द्रयोः रश्मिः ग्रहगणैः सह मन्दं भवति, प्रचण्डवातः चलति, तथा सम्पूर्णजगतः चक्राकृतिवत् भ्रमणशीलता प्रतीयते।[10]

**उष्णोर्मिकाः** - ग्रीष्मकाले प्रचण्डोष्ण-शुष्कवायुः उष्णोर्मिकानाम्ना ज्ञायते। चित्रे उष्णोर्मिकाप्रभावितः जनः दृश्यते -




बृहत्संहितायाम् उष्णोर्मिकाविषये प्रतिपादितं वर्तते यत् भौमसंवत्सरे, वर्षे, मासे दिवसे वा सूर्यातपश्लिष्टमरुतः ग्रामेषु, वनेषु, नगरेषु, पत्तनादिषु सञ्चरन्तः अतिप्रचण्डाम् अग्निस्वरूपमिव स्वीकुर्वन्ति। यथा –

**वातोद्धतश्चरति वह्निरतिप्रचण्डो।**

**ग्रामान् वनानि नगराणि च सन्दिधक्षुः**[11]**॥**

पुनः शिशिरर्तौ अर्थात् माघ-फाल्गुनादिमासेषु सूर्यः अत्यन्ततापस्योत्सर्जनं करोति तथा पर्वतसदृशमेघैरपि वृष्टिकरणे असमर्थः भवति[12]।

**ताडित्-झञ्झा** – ताडित्-झञ्झा भूमेः उपर्युत्तेजितवायुमण्डलस्थितिः वर्तते। अस्मिन् झञ्झावाते वायुः

10. प्रक्षुभ्यन्ति क्षितीशाः प्रचलितवसुधा मोदते दस्युवर्गो। धीभ्रंशो बुद्धिभाजां जनपदहरणं चित्रवर्षी पयोदः॥ चन्द्रार्कौ मन्दरश्मी ग्रहगणसहितो वान्ति वाताः प्रचण्डाः। चक्राकारं समग्रं भ्रमति जगदिदं मीनगे सूर्यसूनौ॥ व०सं०,०८.०६

11. बृहत्संहिता, १९.०७

12. तीक्ष्णं तपत्यदितिजः शिशिरेऽपि काले।
नात्यम्बुदा जलमुचोऽचलसन्निकाशाः॥ बृहत्संहिता, १९.०२

प्रचण्डवेगेन वहति, अतिवृष्टिर्हिमवृष्टिश्च भवति, मेघानां परस्परमतिध्वनियुक्तः संयोगः तथा विद्युतां परस्परसंयोगादिकं भवति। यथाऽत्र चित्रे प्रदर्श्यते -



आचार्यैः उक्तं यत् कृष्णमेघयुक्तविद्युत् कृष्णा कथ्यते। एषा विद्युत् वायुयुक्तवृष्टिं करोति यथा –

**कृष्णा तु कृष्णमार्गस्था वातवर्षावहा भवेत्**[13]**॥**

बृहत्संहितायाम् इदमुच्यते यत् बृहस्पति-बुध-भौम-शनैश्चराः शुक्रस्याग्रपथानुवर्तिनः यदा भवन्ति तदा कालेऽस्मिन् मनुष्याणां नागानां देवानां च सङ्ग्रामाः भवन्ति तथा वायवः समुच्छ्रितानां पर्वतानां वृक्षादीनाम् अन्तकाः श्रृङ्गाग्रपातिनश्च भवन्तीति[14]। भद्रबाहुसंहितायामप्युक्तं यत्-

**यदा स्थितौ जीवबुधौ ससूर्यौ राशिस्थितानाञ्च तथानुवर्तिनौ।**

**नृनागबद्धावरसङ्गरस्तदा भवन्ति वाताः समुपस्थितान्ताः**[15]**॥**

**मेघपतनम् –**



मेघपतनं वायुमण्डलस्य प्रलयकारि स्वरूपं वर्तते। अस्मिन् काले ध्वनियुक्तमेघाः अकस्मात् अतितीव्रवेगेन जलं स्रवन्ति। यस्मिन् क्षेत्रे मेघपतनं भवति तस्मिन् क्षेत्रे अकस्मात् आकाशात् महज्जलस्रावात् महापूरादयः उत्पाताः जायन्ते। यथोक्तमाचार्यैः –

13. भद्रबाहुसंहिता ०५.०४
14. यदा स्थिता जीवबुधारसूर्यजाः सितस्य सर्वेऽग्रपथानुवर्तिनः।
नृनागविद्याधरसङ्गरास्तदा भवन्ति वाताश्च समुच्छ्रितान्तकाः॥ बृहत्संहिता, ०९.३८
15. भद्रबाहुसंहिता, २७.०१

**न मित्रभावे सुहृदो व्यवस्थिताः क्रियासु सम्यग् न रता द्विजातयः।**
**न चाल्पमप्यम्बु ददाति वासवो भिनत्ति वज्रेण शिरांसि भूभृताम्॥**[16]

एतदनुसारं यदा बृहस्पतिः, बुधः, भौमः, शनैश्चरश्च शुक्रस्याग्रपथानुवर्तिनः भवन्ति तदा मित्राणि मित्रतां न भजन्ते। ब्राह्मणाः विहितासु क्रियास्वग्निहोत्राद्यासु सक्ताः न भवन्ति, तथा इन्द्रः अत्यधिकं जल प्रयच्छति, पर्वतानाम् उल्कया शिरांसि भिनत्ति विदारयतीत्यर्थः। इदमेव अन्यत्रापि उच्यते यत् यदा शुभग्रहः मित्रभावे न भवेत् तदा वृष्ट्यभावः भवति। तथा विद्युत्पातकारणात् पर्वतानां मस्तकं भिनत्ति, अवर्षणञ्च करोति।[17]

## भौमिक-भौमोत्पातानां ज्ञानम्

**अग्निनगस्फोटः -** पृथिव्याः आन्तरिकभागे एतादृशानि चक्राणि उपस्थितानि वर्तन्ते येन पृथिव्याः मध्यभागात् उष्णद्रव्यं वायुः (गैस) भस्मादितत्त्वानि बहिः धरातलं आयान्ति। वस्तुतः भूकेन्द्रादारभ्य पृथिवी विविधशकलखण्डवत् संरचिता वर्तते। भूमिस्तरेषु सर्वतः उपरि नाभिकूपिका भवति येन माध्यमेन पृथिव्याः आन्तरिकपदार्थाः बहिः निर्गच्छति। निर्गताः इमे पदार्थाः एव अग्निनगस्फोटनाम्ना प्रसिद्धाः। चित्रं स्पष्टयति अग्निनगस्फोटम्।



बृहत्संहितायामुक्तमस्ति यत् यदा विनाग्निं यत्र धूमो दृश्यते, दिनभागे धूलिरन्धकारश्च दृश्येते तन्महद्भयं ददाति। तथा निशायां विगतमेघे नक्षत्राणामदर्शनं, दिनभागे नक्षत्राणां दर्शनं महद्भयं ददातीति[18]। आचार्यगर्गेणाप्युक्तम् -

**अनिशानि तमांसि स्युर्यदि वा पांशवो रजः।**
**धूमश्चानग्निना यत्र तत्र विन्द्यान्महद्भयम्॥**

---

16. बृ०सं०,०९.३९
17. न मित्रभावे सुहृदः समेता न चाल्पतरमम्बु ददाति वासवः।
 भिनत्ति वज्रेण तदा शिरांसि महीभृतां चाप्यपवर्षणं च॥ भ०सं०,२७.०२
18. धूमोऽनग्निसमुत्थो रजस्तमश्चाह्निजं महाभयदम्।
 व्यभ्रे निश्युडुनाशो दर्शनमपि चाह्नि दोषकरम्॥ बृहत्संहिता, ४६.२१

**दावाग्निः -** वनेषु प्रज्वलितः प्रचण्डाग्निः दावाग्निनाम्ना ज्ञायते। दावाग्निः मुख्यरूपेण तदा भवति यदा वनस्पतिः मृत्तिका च अतिशुष्का भवति। सन्दर्भचित्रम् -



**अग्निकाण्डः -** अग्निकारणात् गृहेषु, आपणेषु, विपण्यादिषु सम्पन्नाशः एव अग्निकाण्डोत्पातनाम्ना उच्यते। सन्दर्भचित्रमत्र प्रदर्श्यते -



केषां ग्रहनक्षत्राणां सञ्चारवशात् अयमुत्पातः भवति इत्यस्मिन् विषये वसिष्ठसंहितायां प्रतिपादितम् यत् यदा पूर्वाभाद्रपद-उत्तराभाद्रपद-भरण्यादिषु बुधः सञ्चरति तदा प्रचण्डाग्निः समग्रस्यापि दहनं करोति। तथा प्राणिनां सप्तधातून् अपि विकलान् करोति। यथा –

**हौतभुगजपादायमयाम्यर्क्षेषु शीतदीधितेस्तनयः।**
**अतिविपुलकरोत्यग्निं घ्नन् देहभृतां सप्तधातुविकलकरः**[19]**॥**

**भूकम्पः -** भूम्याः कम्पनमेव भूकम्पः। भूकम्पः भूम्याः आन्तरिकक्रियापरिणामस्वरूपेण जायते। पृथिव्याम् आन्तरिकक्रियायाः प्रभावः यदा भूमेः उपरितनभागे भवति तदा तत्र विभिन्नक्रियाः भवन्ति। प्रकम्पनमिदम् एतावद् बलिष्ठं भवति यत् पृथिव्याः समग्रमपि धरातलं कम्पनमारभते। येन बहुविधः नाशः जायते। एतद् कम्पनमेव भूकम्पनाम्ना ज्ञायते। सन्दर्भचित्रमत्र प्रदर्श्यते -

---

19. वसिष्ठसंहिता, ०५.०५



वसिष्ठसंहितायामुक्तं यत् यदा भौमः पूर्वफाल्गुन्यामुदेति, उत्तराषाढायां वक्री भवति, रोहिण्याञ्च अस्तङ्गच्छति तदा सम्पूर्णपृथिव्याः भ्रमणम् अर्थात् भूकम्पः भवति[20]। वृद्धगर्गादयः इदं भूकम्पमदृष्टकारितं प्राहुः। धर्मवृद्धया प्रजानां शुभसंसूचनाय शुभः भूमिकम्पः जायते। अधर्माभिवृद्ध्या प्रजानाम् अशुभसंसूचनाय अशुभः भूमिकम्पः उत्पद्यत इति। तथा च वृद्धगर्गः –

**प्रजा धर्मरता यत्र तत्र कम्पं शुभं वदेत्। जनानां श्रेयसे नित्यं विसृजन्ति सुरोत्तमाः॥**

**विपरीतस्थिता यत्र जनास्तत्राशुभं तथा। विसृजन्ति प्रजानां तु दुःखशोकाभिवृद्धये॥**

## जलीयभौमोत्पातानां ज्ञानम्

**सुनामी -** समुद्रस्य प्रकम्पनेन जलोर्मिकानां तीव्रसञ्चारः एव वर्तमाने सुनामीनाम्ना प्रसिद्धमस्ति। एषा सुनामी ज्वारीयौर्मिकाः अथवा भूकम्पीयौर्मिकानाम्नापि ज्ञायते। समुद्रस्य तलान्दोलनकारणात् समुद्रस्य तलोपरि जलं तीव्रवेगेन उपर्यधः दोलायते यस्मात् सुनामी-ऊर्मिकाः उत्पद्यन्ते। समुद्रभूकम्पः, अग्निनगस्फोटः, उल्कापातादिकं सुनाम्याः प्रमुखकारणं वर्तते। सन्दर्भचित्रमत्र प्रदर्श्यते -



नारदसंहितायामुक्तं यत् यदा परिवेषान्तर्गताः चत्वारः ग्रहाः भवन्ति तदा नृपस्य मरणं, पञ्चग्रहाश्चेत् जलप्रलयकारी भवतीति। यथा -

**<u>चत्वारः</u> परिवेषस्था नृपस्य मरणप्रदाः। परिवेषगताः पञ्च जलप्रलयदा ग्रहाः[21]॥**

20. भूमिसुतः फाल्गुन्योरुदयं कृत्वाथ वक्रितो वैश्वे।
प्रजापत्येऽस्तमितः करोति निखिलधराभ्रमणम्॥ वसिष्ठसंहिता, ०४.०७

21. नारदसंहिता, ३६.३७

**महापूरः -** नदीषु, जलस्रोतस्सु, जलाशयादिष्वत्यधिकजलागमनेन अकस्मात् तथा अस्थायीरूपेण कस्यचित् भूभागस्य जलप्लावः महापूरः कथ्यते अर्थात् यस्मिन् क्षेत्रे बृहद्भूभागः जलमग्नः भवति तथा तत्र अत्यधिक-जनधनहानिः भवति तदैव महापूरोत्पातनाम्ना उच्यते। वनस्पतिविनाशः, अतिवृष्टिः, नद्याः धारासु परिवर्तनादीनि अस्य मुख्यकारणानि वर्तन्ते। सन्दर्भचित्राणि अत्र प्रदर्श्यन्ते –



यदा मेघयुक्तं विद्युत्सहितं स्निग्धगन्धर्वनगरमाकाशे दृश्यते तदा अतिवृष्टिकारणात् भुवि जलसम्प्लावः भवति[22]। यदा श्वेतवर्णीया विद्युत् पतति तदा भुवि जलसम्प्लावः भवति[23]। बृहत्संहितायामप्युक्तं यत् यदा शुक्रः कृत्तिकां भित्वा गच्छति तदा नदीषु कूलातिक्रान्तं जलं वहति। यथोच्यते –

**भिन्दन् गतोऽनलर्क्षं कूलातिक्रान्तवारिवाहाभिः।**
**अव्यक्ततुङ्गनिम्ना समा सरिद्भिर्भवति धात्री॥**[24]

**जैविकभौमोत्पातानां ज्ञानम्**

**महामारी –**



22. यदा चाभ्रैर्घनैर्मिश्रं सघनैः सबलाहकम्।
गन्धर्वनगरं स्निग्धं विन्द्यादुदकसम्प्लवम्॥ भद्रबाहुसंहिता, ११.२१

23. अथ नीलाश्च पीताश्च रक्ताः श्वेताश्च विद्युतः।
एतां श्वेतां पतत्यूर्ध्वं विद्युदुदकसम्प्लवम्॥ भद्रबाहुसंहिता, ०५.१५

24. बृहत्संहिता, ०९.२४

ये रोगाः प्रोटोजोआ-कवक-जीवाणु-विषाण्वादिकारणाद् उद्भवन्ति ते सङ्क्रमणम् अथवा महामारी इति उत्पातनाम्ना ज्ञायते। यथा– शीतज्वरः(मलेरिया), तपेदिकः (टाइफाईड), चेचकः (चिकनफाक्स), शुलास्थिज्वरः (डेगु), श्लेष्मारोगादयः (इन्फ्लुएन्जा) अस्य मुख्यरोगा वर्तन्ते। एते योगाः इत्थं समुद्भवन्ति - यदा सूर्यचन्द्रौ पापग्रहैः ग्रसितौ भवेताम् अथवा पापग्रहदृष्टौ भवेतां तदा मरकदः (महामारी) दुर्भिक्षञ्च भवति।[25] एवमेव यदा शुक्रः रोहिणीशकटं भिनत्ति तदा वसुधा ब्रह्महत्यामिव केशास्थिशकलशबला मिश्रितशुक्लकृष्णा भवति अर्थात् भुवि पातकं भवति।[26] अन्यदपि उच्यते वराहेण -

**पुलिन्दशूद्राश्च सदक्षिणापथाः क्षयं व्रजन्त्यक्षिमरुद्गदोद्भवैः॥**[27]

एतदनुसारं यदा शुक्रस्य अग्रभागे स्थित्वा शनिः सञ्चरेत् तदा पुलिन्दजनाः, शूद्रजनाः तथा दक्षिणदिङ्निवासिजनान् नेत्ररोगेण तथा वायुना ये रोगास्तत्कारणात् विनाशं व्रजन्ति इति।

**सौम्योऽस्तोदययोः पुरो भृगुसुतस्यावस्थितस्तोयकृद्।**
**रोगान् पित्तजकामलांश्च कुरुते पुष्णाति च ग्रैष्मिकान्॥**[28]

यदा शुक्रस्य अग्रभागे स्थित्वा बुधः सञ्चरेत् तदा वृष्टिर्भवति। तथा जनाः पित्तजकामलांश्च रोगैः ग्रसिता भवन्ति। यदा हि वसायुक्तकेतुः (उदगायतो महान् स्निग्धमूर्तिरपरोदयी), रूक्षः, अस्थिकेतुश्च दुर्भिक्षभयप्रदः भवति।[29] एवमेव वसालक्षणयुक्तः, स्निग्धः, पूर्वदिश्युदितः शस्त्रसंज्ञककेतुः भवति। एतादृशः दृष्टकेतुः शस्त्रकलहं मरकञ्च करोति। अन्यदप्युच्यते वराहेण यत् कपालसंज्ञककेतुः, कृष्णपञ्चदश्यां पूर्वदिश्युदित-केतुः, धूम्रवर्णभायुक्तः, आकाशेऽर्द्धविचारिकेतुश्च दुर्भिक्षं मरकम् अवृष्टि-रोगांश्च करोति इति।[30] वर्तमानकालिकः कोरोना अपि एतेष्ववे उत्पातेषु अन्यतमः।

**दुर्भिक्षम् -** यस्मिन् कस्मिन्नपि क्षेत्रे दीर्घकालं यावत् यदा अल्पवृष्टिः वृष्ट्यभावः वा भवेत् तदा दुर्भिक्षं भवति। अस्यां परिस्थितौ मुख्यरूपेण क्षेत्रीयकुपोषण-क्षुधा-महामारि-मरणाभिवृद्धिश्च अत्यधिकं भवति। सन्दर्भचित्रमत्र प्रदर्श्यते -

---

25. सर्वग्रस्तौ दुर्भिक्षमरकदौ पापसन्दृष्टौ॥ बृ०सं०,०५.२७
26. प्राजापत्ये शकटे भिन्ने कृत्वेव पातकं वसुधा। केशास्थिशकलशबला कापालमिव व्रतं धत्ते॥
27. बृ०सं०,०९.४०
28. बृ०सं०,०९.४३
29. बृ०सं०,११,३०
30. दृश्योऽमावास्यायां कपालकेतुः सधूम्ररश्मिशिखः।
प्राङ्नभसोऽर्द्धविचारी क्षुन्मरकावृष्टिरोगकरः॥ बृ०सं०,११.३१



यदा आषाढीपूर्णिमायां रात्रौ अग्निकोणात् वायुः वहति तदा भूमिः अग्निज्वालाभ्यः व्याकुला भूत्वा स्वमुखात् भस्म वमति[31] इति वराहाचार्यस्य वनमालाकारस्य च मतम्। अर्थात् आषाढपूर्णिमायाम् अग्निकोणीयः वायुः दुर्भिक्षम् अग्निभञ्च करोतीति। यथा -

**अनलकोणभवो यदि मारुतो वहति मन्दजवो रजनीमुखे।**
**वमति भस्मकृशानुशिखाकुला वदनतः परितोऽपि वसुन्धरा[32]॥**

नारदसंहितायामप्युक्तं यत् यदा गुरुशुक्रौ उभौ समसप्तके भवेतां तथा प्राग्वीथ्यां पश्चिमवीथ्यां वा संस्थितौ भवेतां तदा वृष्ट्यभावेन दुर्भिक्षं महामारी च जायते। यदि शुक्रस्य अग्रे भौम-बुध-गुरु-शनयः भवेयुः तदा ताडित्-झञ्झा-दुर्भिक्ष-अनावृष्टि-युद्धातङ्कादयः प्रकोपाः भवन्ति[33]।

एतान् विहायापि यद्यपि **महार्घता-आतङ्कवादेत्यादयः** (हिंसात्मकगतिविधयः) शतशः उत्पाताः सन्ति तेषां विस्तृतं विवरणम् अत्र न क्रियते।

**निष्कर्षः**

दिव्यान्तरिक्षभौमोत्पातानाम् अध्ययनेन ज्ञायते यत् भौमोत्पातनिरूपणे दिव्यान्तरिक्षोत्पातयोः अपि महत्त्वपूर्णा भूमिका वर्तते इति। यतोहि विकारयुक्तग्रहनक्षत्राणि तथा उल्कानिर्घातादिकारणादेव भौमोत्पाताः अत्र निरूपिताः दृश्यन्ते। अनेन इदं स्पष्टमेव यत् पृथिव्यां ये केऽपि विकाराः जायमानाः दृश्यन्ते तेषां निरूपणं ग्रहनक्षत्राद्याधारेण भवत्येव। तस्मादेव बृहस्पतिसंहितायाम् उक्तं वर्तते -

---

31. यदा वह्नौ वायुर्वहति गगने खण्डिततनुः।
प्लवत्यस्मिन् योगे भगवति पतङ्गे प्रवसति।
तदा नित्योद्दीप्ता ज्वलनशिखरालिङ्गिततला।
स्वगात्रोष्मोच्छ्वासैर्वमति वसुधा भस्मनिकरम्॥ बृहत्संहिता, २७.०३

32. वनमाला, ०१.१३

33. मिथः सप्तम राशिस्थौ पश्चात् प्राग्वीथिसंयुतौ।
गुरुशुक्रावनावृष्टिर्दुर्भिक्षमरणप्रदौ॥
कुजज्ञजीवरविजाः शुक्रस्याग्रेसरा यदा।
युद्धातिवायुदुर्भिक्षं जलनाशकरा तदा॥ नारदसंहिता, २.१०३-१०५

**ग्रहाधीनं जगत् सर्वं ग्रहाधीना: नरावरा:।**

**कालज्ञानं ग्रहाधीनं ग्रहा: कर्मफलप्रदा:॥**

इति शम्।

**कूटशब्दा:** –

| **कूटा:** | **शब्दा:** | **कूटा:** | **शब्दा:** |
|---|---|---|---|
| **न. ज. स्व.** | नरपतिजयचर्यास्वरोदय: | **ना. स.** | नारदसंहिता |
| **बृ. सं.** | बृहत्संहिता | **भ. सं.** | भद्रबाहुसंहिता |
| **व.मा.** | वनमाला | **व.सं.** | वसिष्ठसंहिता |

## सन्दर्भग्रन्थानुक्रमणिका


1. आचार्य, वराहमिहिर. **बृहत्संहिता**. मुक्तस्वाध्यायपीठम: राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालय:), 2016
2. आचार्य, नरपति. (मिश्र, डॉ॰ सत्येन्द्र.) **नरपतिजयचर्यास्वरोदय:**. वाराणसी: चौखम्बा सुरभारती, 2016
3. ज्योतिषाचार्य, डॉ॰ नेमिचन्द्र. **भद्रबाहुसंहिता**. नई दिल्ली: भारतीय ज्ञानपीठ, 2009
4. झा, श्री जीवनाथ. **वनमाला**.
5. रैणा, डॉ. चन्द्रमौलि. **वृद्ध- वसिष्ठसंहिता**. वाराणसी: चौखम्बा कृष्णदास अकादमी, २०१५
6. सेमवाल:, डॉ॰ श्रीकृष्ण. **संस्कृतवाङ्गमये जलविज्ञानम्** . दिल्लि: संस्कृत अकादमी।
7. शर्मा, वसतिराम. **नारदसंहिता**. श्री वेङ्कटेश्वर: (स्टीम) मुम्बय्यी, माघे संवत-१९६३, शक्-संवत. १८२८
8. त्रिपाठी, डॉ॰ शत्रुघ्न. **ज्योतिर्निबन्धादर्श:**. वाराणसी: चौखम्भासुरभारती, 2013

**अन्तर्जालसन्दर्भाः**

1. https://www.aajtak.in.2019-05-16
2. https://www-indiatoday-in.translate. 2025-06-10
3. https://www.opindia.com/2019/05/03
4. https://www.amarujala.com-2024-04-26
5. https://zeenews.india.com/2025-04-30
6. https://www.aajtak.in/2022-07-08
7. https://hindi.gadgets360.com/2023-04-11
8. https://www.who.int
9. https://hindi.news18.com/2019-12-08,20:08(IST)
10. https://www.jagran.com/2022-05-11,01:01(IST)
11. https://www.patrika.com/2019-11-05
12. https://devbhoomisamvad.com/2025-07-10
13. https://navbharattimes.indiatimes.com/2025-05-20
14. https://praveenrajpurohitchaba.wordpress.com/2020/09/20